# स्कन्दपुराणम्
# वैष्णवखण्डः
# बदरिकाश्रममाहात्म्यम्
# skandapurāṇam
# vaiṣṇavakhaṇḍaḥ
# badarikāśramamāhātmyam

## Informazioni:


Titolo: Skanda Purana – Vaishnava Kandha – Badarikasra Kandha
Nome file: skanda_purana_vaishnava_sanskrit_7
Categoria: Purana
Locazione: https://www.culturavedica.org/
Autore: Vyasa
Linguaggio: Sanscrito
Soggetto: Strategia, diplomazia, legislazione, storia, yuga, ecc.
Translitterazione: https://www.culturavedica.org/
Correzione: https://www.culturavedica.org/
Data: 2 giugno 2019
Ultima revisione: 10 maggio 2020
Accesso: https://www.culturavedica.org/purana/
Mail: info@culturavedica.org
Font: Siddhanta – Calibri (IAST)
Testo editabile disponibile: info@culturavedica.org



**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica", può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

## Aiutate a mantenere il rispetto e lo spirito del sito

# Sommario

vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||1|| ........ 3
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||2|| ........ 7
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||3|| ........ 10
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||4|| ........ 14
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||5|| ........ 17
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||6|| ........ 21
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||7|| ........ 25
vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||8|| ........ 29

| | |
|---|---|
| वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥१॥ | vaiṣṇavakhaṇḍaḥ \|\|3\|\| badarikāśramamāhātmyam adhyāyaḥ \|\|1\|\| |
| श्रीबदरीनाथाय नमः । | śrībadarīnāthāya namaḥ \| |
| शौनक उवाच । | śaunaka uvāca \| |
| सूतसूत महाभाग सर्वधर्मविदां वर । | sūtasūta mahābhāga sarvadharmavidāṃ vara \| |
| सर्वशास्त्रार्थतत्त्वज्ञ पुराणे परिनिष्ठित ॥१॥ | sarvaśāstrārthatattvajña purāṇe pariniṣṭhita \|\|1\|\| |
| व्यासः सत्यवतीपुत्रो भगवान्विष्णुरव्ययः । | vyāsaḥ satyavatīputro bhagavānviṣṇuravyayaḥ \| |
| तस्य यत्प्रियशिष्यस्त्वं त्वत्तो वेत्ता न कश्चन ॥२॥ | tasya yatpriyaśiṣyastvaṃ tvatto vettā na kaścana \|\|2\|\| |
| प्राप्ते कलियुगे घोरे सर्वधर्मबहिष्कृते । | prāpte kaliyuge ghore sarvadharmabahiṣkrte \| |
| जना वै दुष्टकर्माणः सर्वधर्मविवर्जिताः ॥३॥ | janā vai duṣṭakarmāṇaḥ sarvadharmavivarjitāḥ \|\|3\|\| |
| क्षुद्रायुषः क्षुद्रप्राणबलवीर्यतपःक्रियाः । | kṣudrāyuṣaḥ kṣudraprāṇabalavīryatapaḥkriyāḥ \| |
| अधर्मनिरताः सर्वे वेदशास्त्रविवर्जिताः ॥४॥ | adharmaniratāḥ sarve vedaśāstravivarjitāḥ \|\|4\|\| |
| तीर्थाटनतपोदानहरिभक्तिविवर्जिताः । | tīrthāṭanatapodānaharibhaktivivarjitāḥ \| |
| कथमेषामल्पकानामुद्धारोऽल्पप्रयत्नतः ॥५॥ | kathameṣāmalpakānāmuddhāro:'lpaprayatnataḥ \|\|5\|\| |
| तीर्थानामुत्तमं तीर्थं क्षेत्राणामुत्तमं तथा । | tīrthānāmuttamaṃ tīrthaṃ kṣetrāṇāmuttamaṃ tathā \| |
| मुमुक्षूणां कुतः सिद्धिः कुत्र वा ऋषिसंचयः ॥६॥ | mumukṣūṇāṃ kutaḥ siddhiḥ kutra vā ṛṣisaṃcayaḥ \|\|6\|\| |
| कुत्र वाल्पप्रयत्नेन तपो मन्त्राश्च सिद्धिदाः । | kutra vālpaprayatnena tapo mantrāśca siddhidāḥ \| |
| कुत्र वा वसति श्रीमाञ्जगतामीश्वरेश्वरः। | kutra vā vasati śrīmāñjagatāmīśvareśvaraḥ\| |
| भक्तानामनुरक्तानामनुग्रहकृपालयः ॥७॥ | bhaktānāmanuraktānāmanugrahakṛpālayaḥ \|\|7\|\| |
| एतदन्यच्च सर्वं मे परार्थैकप्रयोजनम् । | etadanyacca sarvaṃ me parārthaikaprayojanam \| |
| ब्रूहि भद्राय लोकानामनुग्रहविचक्षण ॥८॥ | brūhi bhadrāya lokānāmanugrahavicakṣaṇa \|\|8\|\| |
| सूत उवाच । | sūta uvāca \| |
| साधु साधु महाभाग भवान्परहिते रतः । | sādhu sādhu mahābhāga bhavānparahite rataḥ \| |
| हरिभक्तिकृतासक्तिप्रक्षालितमनोमलः ॥९॥ | haribhaktikṛtāsaktiprakṣālitamanomalaḥ \|\|9\|\| |
| अथ मे देवकीपुत्रो हृत्पद्ममधिरोहति । | atha me devakīputro hṛtpadmamadhirohati \| |
| प्रसंगात्तव विप्रर्षे दुर्लभः साधुसंगमः ॥१०॥ | prasaṃgāttava viprarṣe durllabhaḥ sādhusaṃgamaḥ \|\|10\|\| |
| हरति दुष्कृतसंचयमुत्तमां गतिमलं तनुते तनुमानिनाम् । | harati duṣkṛtasaṃcayamuttamāṃ gatimalaṃ tanute tanumāninām \| |
| अधिकपुण्यवशादवशात्मनां जगति | adhikapuṇyavaśādavaśātmanāṃ jagati |
| दुर्लभः साधुसमागमः ॥११॥ | durlabhaḥ sādhusamāgamaḥ \|\|11\|\| |
| हरति हृदयबन्धं कर्मपाशार्दितानां | harati hṛdayabandhaṃ karmapāśārditānāṃ |
| वितरति पदमुच्चैरल्पजल्पैकभाजाम । | vitarati padamuccairalpajalpaikabhājāma \| |
| जननमरणकर्मश्रांतविश्रांतिहेतुस्त्रिजगति | jananamaraṇakarmaśrāṃtaviśrāṃtihetustrijagati |
| मनुजानां दुर्लभः सत्प्रसंगः ॥१२॥ | manujānāṃ durllabhaḥ satprasaṃgaḥ \|\|12\|\| |
| सूत उवाच । | sūta uvāca \| |
| अयं प्रश्नः पुरा साधो स्कन्देनाकारि सर्वतः । | ayaṃ praśnaḥ purā sādho skandenākāri sarvataḥ \| |
| कैलासशिखरे रम्य ऋषीणां परिश्रृण्वताम् । | kailāsaśikhare ramya ṛṣīṇāṃ pariśṛṇvatām \| |
| पुरतो गिरिजाभर्तुः कर्तुं निःश्रेयसं सताम् ॥१३॥ | purato girijābhartuḥ kartuṃ niḥśreyasaṃ satām \|\|13\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| भगवन्सर्वलोकानां कर्त्ता हर्त्ता पिता गुरुः । | bhagavansarvalokānāṃ karttā harttā pitā guruḥ \| |
| क्षेमाय सर्वजंतूनां तपसे कृतनिश्चयः ॥१४॥ | kṣemāya sarvajaṃtūnāṃ tapase kṛtaniścayaḥ \|\|14\|\| |
| कलिकाले ह्यनुप्राप्ते वेदशास्त्रविवर्जिते । | kalikāle hyanuprāpte vedaśāstravivarjite \| |
| कुत्र वा वसति श्रीमान्भगवान्सात्वतां पतिः ॥१५॥ | kutra vā vasati śrīmānbhagavānsātvatāṃ patiḥ \|\|15\|\| |
| क्षेत्राणि कानि पुण्यानि तीर्थानि सरितस्तथा । | kṣetrāṇi kāni puṇyāni tīrthāni saritastathā \| |
| केन वा प्राप्यते साक्षाद्भगवान्मधुसूदनः । | kena vā prāpyate sākṣādbhagavānmadhusūdanaḥ \| |
| श्रद्दधानाय भगवन्कृपया वद मे पितः ॥१६॥ | śraddadhānāya bhagavankṛpayā vada me pitaḥ \|\|16\|\| |
| श्रीमहादेव उवाच । | śrīmahādeva uvāca \| |
| बहूनि संति तीर्थानि क्षेत्राणि च षडानन । | bahūni saṃti tīrthāni kṣetrāṇi ca ṣaḍānana \| |
| हरिवासनिवासैकपराणि परमार्थिनाम् ॥१७॥ | harivāsanivāsaikaparāṇi paramārthinām \|\|17\|\| |
| काम्यानि कानिचित्संति कानिचिन्मुक्तिदान्यपि । | kāmyāni kānicitsaṃti kānicinmuktidānyapi \| |

इहामुत्रार्थदान्येव बहुपुण्यप्रदानि वै ॥१६॥
गंगा गोदावरी रेवा तपती यमुना सरित् ।
क्षिप्रा सरस्वती पुण्या गौतमी कौशिकी तथा ॥१९॥
कावेरी ताम्रपर्णी च चंद्रभागा महेंद्रजा ।
चित्रोत्पला वेत्रवती सरयूः पुण्यवाहिनी ॥२०॥
चर्मण्वती शतद्रूश्च पयस्विन्यत्रिसंभवा ।
गंडिका बाहुदा सर्वाः पुण्याः सिंधुः सरस्वती ॥२१॥
भुक्तिमुक्तिप्रदाश्चैताः सेव्यमाना मुहुर्मुहुः ।
अयोध्या द्वारका काशी मधुरावंतिका तथा । ॥२२॥
कुरुक्षेत्रं रामतीर्थं कांची च पुरुषोत्तमम् ।
पुष्करं दर्दुरं क्षेत्रं वाराहं विधिनिर्मितम् ।
बदर्य्याख्यं महापुण्यं क्षेत्रं सर्वार्थसाधनम् ॥२३॥
अयोध्यां विधिवद्दृष्ट्वा पुरीं मुक्त्येकसाधनीम् ।
सर्वपापविनिर्मुक्ताः प्रयांति हरिमंदिरम् ॥२४॥
विविधविष्णुनिषेवणपूर्वकाचरितपूजननर्तनकीर्तनाः ।
गृहमपास्य हरेरनुचिंतनाज्जितगृहार्जितमृत्युपराक्रमाः ॥२५॥
स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा रामालयं शुचिः ।
न तस्य कृत्यं पश्यामि कृतकृत्यो भवेद्यतः ॥२६॥
द्वारिकायां हरिः साक्षात्स्वालयं नैव मुंचति ।
अद्यापि भवनं कैश्चित्पुण्यवद्भिः प्रदृश्यते ॥२७॥
गोमत्यां तु नरः स्नात्वा दृष्ट्वा कृष्णमुखांबुजम् ।
मुक्तिः प्रजायते शेषो विना सांख्यं षडानन ॥२८॥
असीवरुणयोर्मध्ये पंचक्रोश्यां महाफलम् ।
अमरा मृत्युमिच्छंति का कथा इतरे जनाः ॥२९॥
मणिकर्ण्यां ज्ञानवाप्यां विष्णुपादोदके तथा ।
ह्रदे पंचनदे स्नात्वा न मातुः स्तनपो भवेत् ॥३०॥
प्रसंगेनापि विश्वेशं दृष्ट्वा काश्यां षडानन ।
मुक्तिः प्रजायते पुंसां जन्ममृत्युविवर्जिता ॥३१॥
बहुना किमिहोक्तेन नैतत्क्षेत्रसमं क्वचित् ।
तपोपवासनिरतो मथुरायां षडानन ।
जन्मस्थानं समासाद्य सर्वपापैः प्रमुच्यते ॥३२॥
विश्रांतितीर्थे विधिवत्स्नात्वा कृत्वा तिलोदकम् ।
पितृनुद्धृत्य नरकाद्विष्णुलोकं प्रगच्छति ॥३३॥
यदि कुर्यात्प्रमादेन पातकं तत्र मानवः ।
विश्रांते स्नानमासाद्य भस्मीभवति तत्क्षणात् ॥३४॥
अवंत्यां विधिवत्स्नात्वा शिप्रायां माधवे नराः ।
पिशाचत्वं न पश्यंति जन्मांतरशतैरपि ॥३५॥
कोटितीर्थे नरः स्नात्वा भोजयित्वा द्विजोत्तमान् ।
महाकालं हरं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥३६॥
मुक्तिक्षेत्रमिदं साक्षान्मम लोकैकसाधनम् ।
दानाद्दरिद्रताहानिरिह लोके परत्र च ॥३७॥
कुरुक्षेत्रे रामतीर्थे स्वर्णं दत्त्वा स्वशक्तितः ।
सूर्योपरागे विधिवत्स नरो मुक्तिभाग्भवेत् ॥३८॥
ये तत्र प्रतिगृह्णंति नरा लोभवशंगताः ।
पुरुषत्वं न तेषां वै कल्पकोटिशतैरपि ॥३९॥
हरिक्षेत्रे हरिं दृष्ट्वा स्नात्वा पादोदके जनः ।
सर्वपापविनिर्मुक्तो हरिणा सह मोदते ॥४०॥
खगगणा विविधा निवसंत्यहो

ihāmutrārthadānyeva bahupuṇyapradāni vai ||16||
gaṃgā godāvarī revā tapatī yamunā sarit |
kṣiprā sarasvatī puṇyā gautamī kauśikī tathā ||19||
kāverī tāmraparṇī ca caṃdrabhāgā maheṃdrajā |
citrotpalā vetravatī sarayūḥ puṇyavāhinī ||20||
carmaṇvatī śatadrūśca payasvinyatrisaṃbhavā |
gaṃḍikā bāhudā sarvāḥ puṇyāḥ siṃdhuḥ sarasvatī ||21||
bhuktimuktipradāścaitāḥ sevyamānā muhurmuhuḥ |
ayodhyā dvārakā kāśī madhurāvaṃtikā tathā | ||22||
kurukṣetraṃ rāmatīrthaṃ kāṃcī ca puruṣottamam |
puṣkaraṃ darduraṃ kṣetraṃ vārāhaṃ vidhinirmitam |
badaryyākhyaṃ mahāpuṇyaṃ kṣetraṃ sarvārthasādhanam ||23||
ayodhyāṃ vidhivaddṛṣṭvā purīṃ muktyekasādhanīm |
sarvapāpavinirmuktāḥ prayāṃti harimaṃdiram ||24||
vividhaviṣṇuniṣevaṇapūrvakācaritapūjananartanakīrtanāḥ |
gṛhamapāsya hareranuciṃtanājjitagṛhārjitamṛtyuparākramāḥ ||25||
svargadvāre naraḥ snātvā dṛṣṭvā rāmālayaṃ śuciḥ |
na tasya kṛtyaṃ paśyāmi kṛtakṛtyo bhavedyataḥ ||26||
dvārikāyāṃ hariḥ sākṣātsvālayaṃ naiva muṃcati |
adyāpi bhavanaṃ kaiścitpuṇyavadbhiḥ pradṛśyate ||27||
gomatyāṃ tu naraḥ snātvā dṛṣṭvā kṛṣṇamukhāṃbujam |
muktiḥ prajāyate śeṣo vinā sāṃkhyaṃ ṣaḍānana ||28||
asīvaruṇayormadhye paṃcakrośyāṃ mahāphalam |
amarā mṛtyumicchaṃti kā kathā itare janāḥ ||29||
maṇikarṇyāṃ jñānavāpyāṃ viṣṇupādodake tathā |
hrade paṃcanade snātvā na mātuḥ stanapo bhavet ||30||
prasaṃgenāpi viśveśaṃ dṛṣṭvā kāśyāṃ ṣaḍānana |
muktiḥ prajāyate puṃsāṃ janmamṛtyuvivarjitā ||31||
bahunā kimihoktena naitatkṣetrasamaṃ kvacit |
tapopavāsanirato mathurāyāṃ ṣaḍānana |
janmasthānaṃ samāsādya sarvapāpaiḥ pramucyate ||32||
viśrāṃtitīrthe vidhivatsnātvā kṛtvā tilodakam |
pitṝnuddhṛtya narakādviṣṇulokaṃ pragacchati ||33||
yadi kuryātpramādena pātakaṃ tatra mānavaḥ |
viśrāṃte snānamāsādya bhasmībhavati tatkṣaṇāt ||34||
avaṃtyāṃ vidhivatsnātvā śiprāyāṃ mādhave narāḥ |
piśācatvaṃ na paśyaṃti janmāṃtaraśatairapi ||35||
koṭitīrthe naraḥ snātvā bhojayitvā dvijottamān |
mahākālaṃ haraṃ dṛṣṭvā sarvapāpaiḥ pramucyate ||36||
muktikṣetramidaṃ sākṣānmama lokaikasādhanam |
dānāddaridratāhāniriha loke paratra ca ||37||
kurukṣetre rāmatīrthe svarṇaṃ dattvā svaśaktitaḥ |
sūryoparāge vidhivatsa naro muktibhāgbhavet ||38||
ye tatra pratigṛhṇaṃti narā lobhavaśaṃgatāḥ |
puruṣatvaṃ na teṣāṃ vai kalpakoṭiśatairapi ||39||
harikṣetre hariṃ dṛṣṭvā snātvā pādodake janaḥ |
sarvapāpavinirmukto hariṇā saha modate ||40||
khagagaṇā vividhā nivasaṃtyaho

ऋषिगणाः फलमूलदलाशनाः ।
पवनसंयमनक्रमनिर्जितेंद्रियपराक्रमणा
मुनयस्त्विह ॥४१॥
विष्णुकांच्यां हरिः साक्षाच्छिवकांच्यां शिवः स्वयम् ।
अभेदादुभयोर्भक्त्या मुक्तिः करतले स्थिता ।
विभेदजननात्पुंसां जायते कुत्सिता गतिः ॥४२॥
सकृद्दृष्ट्वा जगन्नाथं मार्कंडेयह्रदे प्लुतः ।
विना ज्ञानेन योगेन न मातुः स्तनपो भवेत् ॥४३॥
रोहिण्यामुदधौ स्नात्वा इंद्रद्युम्नह्रदे तथा ।
भुक्त्वा निवेदितं विष्णोर्वैकुंठे वसतिं लभेत् ॥४४॥
दशयोजनविस्तीर्णं क्षेत्रं शंखोपरि स्थितम् ।
चतुर्भुजत्वमायांति कीटा अपि न संशयः ॥४५॥
कार्त्तिक्यां पुष्करे स्नात्वा श्राद्धं कृत्वा सदक्षिणम् ।
भोजयित्वा द्विजान्भक्त्या ब्रह्मलोके महीयते ॥४६॥
सकृत्स्नात्वा ह्रदे तस्मिन्यूपं दृष्ट्वा समाहितः ।
सर्वपापविनिर्मुक्तो जायते द्विजसत्तमः ॥४७॥
षष्टिवर्षसहस्राणि योगाभ्यासेन यत्फलम् ।
सौकरे विधिवत्स्नात्वा पूजयित्वा हरिं शुचिः ॥४८॥
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।
तीर्थराजं महापुण्यं सर्वतीर्थनिषेवितम् ॥४९॥
कामिनां सर्वजंतूनामीप्सितं कर्मभिर्भवेत् ।
वेण्यां स्नात्वा शुचिर्भूत्वा कृत्वा माधवदर्शनम् ।
भुक्त्वा पुण्यवतां भोगानन्ते माधवतां व्रजेत् ॥५०॥
माघे मासि नरः स्नात्वा त्रिवेण्यां भक्तिभावितः ।
बदरीकीर्तनात्पुण्यं तत्समाप्नोति मानवः ॥५१॥
दशाश्वमेधिकं तीर्थं दशयज्ञफलप्रदम् ।
संक्षेपात्कथितं पुत्र किं भूयः श्रोतुमिच्छसि ॥५२॥
स्कंद उवाच ।
बदर्य्याख्यं हरेः क्षेत्रं त्रिषु लोकेषु दुर्लभम् ।
क्षेत्रस्य स्मरणादेव महापातकिनो नराः ।
विमुक्तकिल्विषाः सद्यो मरणान्मुक्तिभागिनः ॥५३॥
अन्यतीर्थे कृतं येन तपः परमदारुणम् ।
तत्समा बदरीयात्रा मनसापि प्रजायते ॥५४॥
बहूनि संति तीर्थानि दिवि भूमौ रसातले ।
बदरीसदृशं तीर्थं न भूतं न भविष्यति ॥५५॥
अश्वमेध सहस्राणि वायुभोज्ये च यत्फलम् ।
क्षेत्रांतरे विशालायां तत्फलं क्षणमात्रतः ॥५६॥
कृते मुक्तिप्रदा प्रोक्ता त्रेतायां योगसिद्धिदा ।
विशाला द्वापरे प्रोक्ता कलौ बदरिकाश्रमः ॥५७॥
स्थूलसूक्ष्मशरीरं तु जीवस्य वसतिस्थलम् ।
तद्विनाशयति ज्ञानाद्विशाला तेन कथ्यते ॥५८॥
अमृतं स्रवते या हि बदरीतरुयोगतः ।
बदरी कथ्यते प्राज्ञैर्ऋषीणां यत्र संचयः ॥५९॥
त्यजेत्सर्वाणि तीर्थानि कालेकाले युगेयुगे ।
बदरीं भगवान्विष्णुर्न मुञ्चति कदाचन ॥६०॥
सर्वतीर्थावगाहेन तपोयोगसमाधितः ।
तत्फलं प्राप्यते सम्यग्बदरीदर्शनाद्गुह ॥६१॥
षष्टिवर्षसहस्राणि योगाभ्यासेन यत्फलम् ।

ṛṣigaṇāḥ phalamūladalāśanāḥ |
pavanasaṃyamanakramanirjiteṃdriyaparākramaṇā
munayastviha ||41||
viṣṇukāṃcyāṃ hariḥ sākṣācchivakāṃcyāṃ śivaḥ svayam |
abhedādubhayorbhaktyā muktiḥ karatale sthitā |
vibhedajananātpuṃsāṃ jāyate kutsitā gatiḥ ||42||
sakṛddṛṣṭvā jagannāthaṃ mārkaṃḍeyahrade plutaḥ |
vinā jñānena yogena na mātuḥ stanapo bhavet ||43||
rohiṇyāmudadhau snātvā iṃdradyumnahrade tathā |
bhuktvā ni◌̀veditaṃ viṣṇorvaikuṃṭhe vasatiṃ labhet ||44||
daśayojanavistīrṇaṃ kṣetraṃ śaṃkhopari sthitam |
catu◌्rbhujatvamāyāṃti kīṭā api na saṃśayaḥ ||45||
kārttikyāṃ puṣkare snātvā śrāddhaṃ kṛtvā sadakṣiṇam |
bhojayitvā dvijānbhaktyā brahmaloke mahīyate ||46||
sakṛtsnātvā hrade tasminyūpaṃ dṛṣṭvā samāhitaḥ |
sarvapāpavinirmukto jāyate dvijasattamaḥ ||47||
ṣaṣṭivarṣasahasrāṇi yogābhyāsena yatphalam |
saukare vidhivatsnātvā pūjayitvā hariṃ śuciḥ ||48||
saptajanmakṛtaṃ pāpaṃ tatkṣaṇādeva naśyati |
tīrtharājaṃ mahāpuṇyaṃ sarvatīrthaniṣevitam ||49||
kāmināṃ sarvajaṃtūnāmīpsitaṃ karmabhirbhavet |
veṇyāṃ snātvā śucirbhūtvā kṛtvā mādhavadarśanam |
bhuktvā puṇyavatāṃ bhogānante mādhavatāṃ vrajet ||50||
māghe māsi naraḥ snātvā triveṇyāṃ bhaktibhāvitaḥ |
badarīkīrtanātpuṇyaṃ tatsamāpnoti mānavaḥ ||51||
daśāśvamedhikaṃ tīrthaṃ daśayajñaphalapradam |
saṃkṣepātkathitaṃ putra kiṃ bhūyaḥ śrotumicchasi ||52||
skaṃda uvāca |
badaryyākhyaṃ hareḥ kṣetraṃ triṣu lokeṣu durlabham |
kṣetrasya smaraṇādeva mahāpātakino narāḥ |
vimuktakilviṣāḥ sadyo maraṇānmuktibhāginaḥ ||53||
anyatīrthe kṛtaṃ yena tapaḥ paramadāruṇam |
tatsamā badarīyātrā manasāpi prajāyate ||54||
bahūni saṃti tīrthāni divi bhūmau rasātale |
badarīsadṛśaṃ tīrthaṃ na bhūtaṃ na bhaviṣyati ||55||
aśvamedha sahasrāṇi vāyubhojye ca yatphalam |
kṣetrāṃtare viśālāyāṃ tatphalaṃ kṣaṇamātrataḥ ||56||
kṛte muktipradā proktā tretāyāṃ yogasiddhidā |
viśālā dvāpare proktā kalau badarikāśramaḥ ||57||
sthūlasūkṣmaśarīraṃ tu jīvasya vasatisthalam |
tadvināśayati jñānādviśālā tena kathyate ||58||
amṛtaṃ sravate yā hi badarītaruyogataḥ |
badarī kathyate prājñair–ṛṣīṇāṃ yatra saṃcayaḥ ||59||
tyajetsarvāṇi tīrthāni kālekāle yugeyuge |
badarīṃ bhagavānviṣṇurna muñcati kadācana ||60||
sarvatīrthāvagāhena tapoyogasamādhitaḥ |
tatphalaṃ prāpyate samyagbadarīdarśanādguha ||61||
ṣaṣṭivarṣasahasrāṇi yogābhyāsena yatphalam |

| | |
|---|---|
| वाराणस्यां दिनैकेन तत्फलं बदरीं गतौ ॥६२॥ | vārāṇasyāṃ dinaikena tatphalaṃ badarīṃ gatau \|\|62\|\| |
| तीर्थानां वसतिर्यत्र देवानां वसतिस्तथा । | tīrthānāṃ vasatiryatra devānāṃ vasatistathā \| |
| ऋषीणां वसतिर्यत्र विशाला तेनकथ्यते ॥६३॥ | ṛṣīṇāṃ vasatiryatra viśālā tenakathyate \|\|63\|\| |

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे
बदरिकाश्रमस्य सर्वतीर्थाधिकत्ववर्णनंनाम प्रथमोऽध्यायः ॥१॥

iti śrīskāṃde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ
dvitīye vaiṣṇavakhaṇḍe badarikāśramamāhātmye śivakārttikeyasaṃvāde
badarikāśramasya sarvatīrthādhikatvavarṇanaṃnāma prathamo:'dhyāyaḥ ||1||

वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥२॥
स्कंद उवाच ।
कथमेतत्समुत्पन्नं कैर्वा क्षेत्रं निषेवितम् ।
को वा तस्याप्यधीशः स्यादेतद्विस्तरतो वद ॥१॥
शिव उवाच ।
अनादिसिद्धमेतत्तु यथा वेदा हरेस्तनूः ।
अधिष्ठाता हरिः साक्षान्नारदाद्यैर्निषेवितम् ॥२॥
पुरा कृतयुगस्यादौ स्वीयां दुहितरं विधिः ।
रूपयौवनसंपन्नां स तां यभितुमुद्यतः ॥३॥
तं दृष्ट्वा तादृशं रोषाच्छिरः खड्गेन पञ्चधा ।
चिच्छेदाऽहं कपालं तद्ब्रह्महत्यासमुद्यते ॥४॥
हस्ते कृत्वा जगामाशु तत्र तीर्थानि सेवितुम् ।
दिवि भूमौ च पाताले तपश्चरणपूर्वकम् ॥५॥
न गता ब्रह्महत्या मे कपालं तादृशं करे ।
तदा वैकुण्ठमगमं द्रष्टुं लक्ष्मीपतिं हरिम् ॥६॥
विनयावनतो भूत्वा नमस्कृत्य पुनः पुनः ।
सर्वमाख्यातवांस्तस्मै व्यसनं करुणात्मने ॥७॥
तस्योपदिष्टमादाय बदरीं समुपागतः ।
तत्क्षणाद्ब्रह्महत्या मे वेपमाना मुहुर्मुहुः ॥८॥
अंतर्हितं कपालं तत्कराद्विगलितं मम ।
ततःप्रभृति तत्क्षेत्रं पार्वत्या सह सादरम् ॥९॥
तिष्ठामि तप आस्थाय ऋषीणां प्रीतिमावहन् ।
वाराणस्यां यथा प्रीतिः श्रीशैलशिखरे तथा ॥१०॥
कैलासे शिवया सार्द्धं ततोनंतगुणाधिका ।
अन्यत्र भरणान्मुक्तिः स्वधर्मविधिपूर्वकात ॥११॥
बदरी दर्शनादेव मुक्तिः पुंसां करे स्थिता ।
हरेश्चरणसान्निध्यं यत्र वैश्वानरः स्वयम् ॥१२॥
तत्र केदाररूपेण मम लिंगं प्रतिष्ठितम् ।
केदारदर्शनात्स्पर्शादर्च्चनाद्भक्तिभावतः ॥१३॥
कोटिजन्मकृतं पापं भस्मीभवति तत्क्षणात् ।
कलामात्रेण तिष्ठामि तत्र क्षेत्रे विशेषतः ॥१४॥
कला पंचदशैवात्र मूर्तिमध्ये ह्यवस्थितम् ॥१५॥
जितकृतांतभयाः शिवयोगिनः
कृतमृगाजिनकृत्तिसुवाससः ।
वरविभूतिजटान्वितभूषणाः स्वयमुपासत
एव जटाधरम् ॥१६॥
फलदलांबुसमीरणतोषिताः शिवमनोजितमृत्युपरिश्रमाः ।
गिरिवरस्थितनिर्जितमानसाः
प्रसरनिर्म्मलबुद्धिमहोदयाः ॥१७॥
कमलकोमलकांतिमुखांबुजाः शिवकृपाजितनिर्भरवैरिणः ।
करधृतांजलिमौलिशिवेक्षणाः
शिवमुपासत एव निशामुखे ॥१८॥
करधृतजपमालाः शांतिसंतोषभाजः
कृतनतिपरनित्यप्रार्थनाश्चन्द्रमौलौ ।
हरचरणसरोजध्यानविज्ञानमूर्तिव्यथितजनमनोजाः
सर्वभावान्नितांतम् ॥१९॥
वाराणस्यां मृतानां च तारकं ब्रह्मसंज्ञकम् ।
जनानां पूजनात्तत्र मम लिंगस्य जायते ॥२०॥

vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||2||
skaṃda uvāca |
kathametatsamutpannaṃ kairvā kṣetraṃ niṣevitam |
ko vā tasyāpyadhīśaḥ syādetadvistarato vada ||1||
śiva uvāca |
anādisiddhametattu yathā vedā harestanūḥ |
adhiṣṭhātā hariḥ sākṣānnāradādyairniṣevitam ||2||
purā kṛtayugasyādau svīyāṃ duhitaraṃ vidhiḥ |
rūpayauvanasaṃpannāṃ sa tāṃ yabhitumudyataḥ ||3||
taṃ dṛṣṭvā tādṛśaṃ roṣācchiraḥ khaḍgena pañcadhā |
cicchedā:'haṃ kapālaṃ tadbrahmahatyāsamudyate ||4||
haste kṛtvā jagāmāśu tatra tīrthāni sevitum |
divi bhūmau ca pātāle tapaścaraṇapūrvakam ||5||
na gatā brahmahatyā me kapālaṃ tādṛśaṃ kare |
tadā vaikuṇṭhamagamaṃ draṣṭuṃ lakṣmīpatiṃ harim ||6||
vinayāvanato bhūtvā namaskṛtya punaḥ punaḥ |
sarvamākhyātavāṃstasmai vyasanaṃ karuṇātmane ||7||
tasyopadiṣṭamādāya badarīṃ samupāgataḥ |
tatkṣaṇādbrahmahatyā me vepamānā muhurmuhuḥ ||8||
aṃtarhitaṃ kapālaṃ tatkarādvigalitaṃ mama |
tataḥprabhṛti tatkṣetraṃ pārvatyā saha sādaram ||9||
tiṣṭhāmi tapa āsthāya ṛṣīṇāṃ prītimāvahan |
vārāṇasyāṃ yathā prītiḥ śrīśailaśikhare tathā ||10||
kailāse śivayā sārddhaṃ tatonaṃtaguṇādhikā |
anyatra bharaṇānmuktiḥ svadharmavidhipūrvakāta ||11||
badarī darśanādeva muktiḥ puṃsāṃ kare sthitā |
hareścaraṇasānnidhyaṃ yatra vaiśvānaraḥ svayam ||12||
tatra kedārarūpeṇa mama liṃgaṃ pratiṣṭhitam |
kedāradarśanātsparśādarccanādbhaktibhāvataḥ ||13||
koṭijanmakṛtaṃ pāpaṃ bhasmībhavati tatkṣaṇāt |
kalāmātreṇa tiṣṭhāmi tatra kṣetre viśeṣataḥ ||14||
kalā paṃcadaśaivātra mūrtimadhye hyavasthitam ||15||
jitakṛtāṃtabhayāḥ śivayoginaḥ
kṛtamṛgājinakṛttisuvāsasaḥ |
varavibhūtijaṭānvitabhūṣaṇāḥ svayamupāsata
eva jaṭādharam ||16||
phaladalāṃbusamīraṇatoṣitāḥ śivamanojitamṛtyupariśramāḥ |
girivarasthitanirjitamānasāḥ
prasaranirmmalabuddhimahodayāḥ ||17||
kamalakomalakāṃtimukhāṃbujāḥ śivakṛpājitanirbharavairiṇaḥ |
karadhṛtāṃjalimauliśivekṣaṇāḥ
śivamupāsata eva niśāmukhe ||18||
karadhṛtajapamālāḥ śāṃtisaṃtoṣabhājaḥ
kṛtanatiparanityaprārthanāścandramaulau |
haracaraṇasarojadhyānavijñānamūrtivyathitajanamanojāḥ
sarvabhāvānnitāṃtam ||19||
vārāṇasyāṃ mṛtānāṃ ca tārakaṃ brahmasaṃjñakam |
janānāṃ pūjanāttatra mama liṃgasya jāyate ||20||

| | |
|---|---|
| वह्नितीर्थं परिभ्राजद्भगवच्चरणांतिके । | vahnitīrthaṃ paribhrājadbhagavaccaraṇāṃtike \| |
| केदाराख्यं महालिंगं दृष्ट्वा नो जन्मभाग्भवेत् ॥२१॥ | kedārākhyaṃ mahāliṃgaṃ dṛṣṭvā no janmabhāgbhavet \|\|21\|\| |
| स्कन्द उवाच । | skanda uvāca \| |
| कथं वैश्वानरः श्रीमान्सर्वलोकैककारणम् । | kathaṃ vaiśvānaraḥ śrīmānsarvalokaikakāraṇam \| |
| बदरीमनुसंतस्थौ तन्मे वद महामते ॥२२॥ | badarīmanusaṃtasthau tanme vada mahāmate \|\|22\|\| |
| शिव उवाच । | śiva uvāca \| |
| पुरा समाजः समभूदृषीणामूर्ध्वरेतसाम् । | purā samājaḥ samabhūdṛṣīṇāmūrdhvaretasām \| |
| गंगा भगवती यत्र कालिंद्या सह संगता ॥२३॥ | gaṃgā bhagavatī yatra kāliṃdyā saha saṃgatā \|\|23\|\| |
| दशाश्वमेधिकं नाम तीर्थं त्रैलोक्यविश्रुतम् । | daśāśvamedhikaṃ nāma tīrthaṃ trailokyaviśrutam \| |
| बभूव तत्र भगवान्हुतभुक्प्रश्रयानतः । | babhūva tatra bhagavānhutabhukpraśrayānataḥ \| |
| ऋषीणामग्रतः स्थित्वा प्रष्टुं समुपचक्रमे ॥२४॥ | ṛṣīṇāmagrataḥ sthitvā praṣṭuṃ samupacakrame \|\|24\|\| |
| वैश्वानर उवाच । | vaiśvānara uvāca \| |
| दृष्ट्वा इहैकदृग्ज्ञाना भवन्तो ब्रह्मवित्तमाः । | dṛṣṭvā ihaikadṛgjñānā bhavanto brahmavittamāḥ \| |
| दीनार्थे करुणापूर्णा हृदयार्द्रा दयालवः ॥२५॥ | dīnārthe karuṇāpūrṇā hṛdayārdrā dayālavaḥ \|\|25\|\| |
| सर्वदुर्लक्षणोद्भूतपातकालिप्तचेतसः । | sarvadurlakṣaṇodbhūtapātakāliptacetasaḥ \| |
| कथं स्यान्निरयान्मुक्तिर्मम ब्रह्मविदुत्तमाः ॥२६॥ | kathaṃ syānnirayānmuktirmama brahmaviduttamāḥ \|\|26\|\| |
| सर्वेषामृषिवर्य्याणामाजगाम मुनीश्वरः । | sarveṣāmṛṣivaryyāṇāmājagāma munīśvaraḥ \| |
| गंगांभसि समाप्लुत्य वाक्यं चेदमुवाच ह ॥२७॥ | gaṃgāṃbhasi samāplutya vākyaṃ cedamuvāca ha \|\|27\|\| |
| व्यास उवाच । | vyāsa uvāca \| |
| अस्त्येकः परमोपायो भवतः पापनिष्कृतौ । | astyekaḥ paramopāyo bhavataḥ pāpaniṣkṛtau \| |
| सर्वभक्षाख्यदोषस्य बदरीं शरणं श्रय ॥२८॥ | sarvabhakṣākhyadoṣasya badarīṃ śaraṇaṃ śraya \|\|28\|\| |
| यत्रास्ते भगवान्साक्षाद्देवदेवो जनार्द्दनः । | yatrāste bhagavānsākṣāddevadevo janārddanaḥ \| |
| भक्तानामप्यभक्तानामघहा मधुसूदनः ॥२९॥ | bhaktānāmapyabhaktānāmaghahā madhusūdanaḥ \|\|29\|\| |
| तत्र गंगांभसि स्नात्वा कृत्वा प्रदक्षिणां हरेः । | tatra gaṃgāṃbhasi snātvā kṛtvā pradakṣiṇāṃ hareḥ \| |
| दंडवत्प्रणिपातेन सर्वपापक्षयो भवेत् ॥३०॥ | daṃḍavatpraṇipātena sarvapāpakṣayo bhavet \|\|30\|\| |
| ततो व्यासमुखाच्छ्रुत्वा ऋषीणामनुवादतः । | tato vyāsamukhācchrutvā ṛṣīṇāmanuvādataḥ \| |
| उत्तराभिमुखो वह्निर्गंधमादनमाययौ ॥३१॥ | uttarābhimukho vahnirgaṃdhamādanamāyayau \|\|31\|\| |
| ततो बदरिकां प्राप्य स्नात्वा गंगांभसि स्वयम्। | tato badarikāṃ prāpya snātvā gaṃgāṃbhasi svayam\| |
| नारायणाश्रमं गत्वा नत्वा प्रोवाच भक्तिमान् ॥३२॥ | nārāyaṇāśramaṃ gatvā natvā provāca bhaktimān \|\|32\|\| |
| अग्निरुवाच । | agniruvāca \| |
| विशुदविज्ञानघनं पुराणं सनातनं विश्वसृजां पतिं गुरुम् । | viśudavijñānaghanaṃ purāṇaṃ sanātanaṃ viśvasṛjāṃ patiṃ gurum \| |
| अनेकमेकं जगदेकनाथं | anekamekaṃ jagadekanāthaṃ |
| नमाम्यनंताश्रितशुद्धबुद्धिम् ॥३३॥ | namāmyanaṃtāśritaśuddhabuddhim \|\|33\|\| |
| मायामयीं शक्तिमुपेत्य विश्वकर्त्तारमुद्दिश्य रजोपयुक्तम् । | māyāmayīṃ śaktimupetya viśvakarttāramuddiśya rajopayuktam \| |
| सत्त्वेन चास्य स्थितिहेतुमुग्रमथो | sattvena cāsya sthitihetumugramatho |
| तमोभिग्रसितारमीडे ॥३४॥ | tamobhigrasitāramīḍe \|\|34\|\| |
| अविद्यया विश्वविमोहितात्मा | avidyayā viśvavimohitātmā |
| विद्यैकरूपं विततं त्रिलोक्याम् । | vidyaikarūpaṃ vitataṃ trilokyām \| |
| विद्याश्रितत्वात्सकलज्ञमीशं त्वविद्यया | vidyāśritatvātsakalajñamīśaṃ tvavidyayā |
| जीवमहं प्रपद्ये ॥३५॥ | jīvamahaṃ prapadye \|\|35\|\| |
| भक्तेच्छयाविष्कृतदेहयोगमाभोगभोगार्पितयोगयोगम् । | bhaktecchayāviṣkṛtadehayogamābhogabhogārpitayogayogam \| |
| कौशेयपीताम्बरजुष्टशक्तिं विचित्रशक्त्यष्टमयेष्टमीडे ॥३६॥ | kauśeyapītāmbarajuṣṭaśaktiṃ vicitraśaktyaṣṭamayeṣṭamīḍe \|\|36\|\| |
| अथ प्रसन्नो भगवान्स्तुतः सर्वैर्हृदि स्थितः । | atha prasanno bhagavānstutaḥ sarvairhṛdi sthitaḥ \| |
| प्रोवाच मधुरं वाक्यं पावकं पावनार्थिनम् ॥३७॥ | provāca madhuraṃ vākyaṃ pāvakaṃ pāvanārthinam \|\|37\|\| |
| श्रीनारायण उवाच । | śrīnārāyaṇa uvāca \| |
| वरं वरय भद्रं ते वरदोऽहमुपागतः । | varaṃ varaya bhadraṃ te varado:'hamupāgataḥ \| |
| स्तवेनानेन तुष्टोऽस्मि विनयेन तवानध ॥३८॥ | stavenānena tuṣṭo:'smi vinayena tavānadha \|\|38\|\| |
| अग्निरुवाच । | agniruvāca \| |

| | |
|---|---|
| ज्ञातं भगवता सर्वं यदर्थमहमागतः । | jñātaṃ bhagavatā sarvaṃ yadarthamahamāgataḥ \| |
| तथापि कथयाम्येतदीश्वराज्ञानुपालनम् ॥३९॥ | tathāpi kathayāmyetadīśvarājñānupālanam \|\|39\|\| |
| सर्वभक्षो भवाम्येव निष्कृतिस्तु कथं भवेत् । | sarvabhakṣo bhavāmyeva niṣkṛtistu kathaṃ bhavet \| |
| अत्यन्तभयसंपत्तिरेतस्माज्जायते मम ॥४०॥ | atyantabhayasaṃpattiretasmājjāyate mama \|\|40\|\| |
| श्रीनारायण उवाच । | śrīnārāyaṇa uvāca \| |
| क्षेत्रदर्शनमात्रेण प्राणिनां नास्ति पातकम् । | kṣetradarśanamātreṇa prāṇināṃ nāsti pātakam \| |
| मत्प्रसादात्पातकं तु त्वयि मास्तु कदाचन ॥४१॥ | matprasādātpātakaṃ tu tvayi māstu kadācana \|\|41\|\| |
| ततः प्रभृति भूतात्मा पावकः सर्वतो भृशम् । | tataḥ prabhṛti bhūtātmā pāvakaḥ sarvato bhṛśam \| |
| कलयावस्थितश्चात्र सर्वदोषविवर्जितः ॥४२॥ | kalayāvasthitaścātra sarvadoṣavivarjitaḥ \|\|42\|\| |
| य एतत्प्रातरुत्थाय शृणोति श्रावयेच्छुचिः । | ya etatprātarutthāya śṛṇoti śrāvayecchuciḥ \| |
| अग्नितीर्थकृतस्नानं फलं प्राप्नोत्यसंशयम् ॥४३॥ | agnitīrthakṛtasnānaṃ phalaṃ prāpnotyasaṃśayam \|\|43\|\| |

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
द्वितीये वैष्णवखण्डे श्रीबदरिकाश्रममाहात्म्ये
ऽग्निकृतभगवत्स्तुतिवर्णनंनाम द्वितीयोऽध्यायः ॥२॥

iti śrīskāṃde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ
dvitīye vaiṣṇavakhaṇḍe śrībadarikāśramamāhātmye:
'gnikṛtabhagavatstutivarṇanaṃnāma dvitīyo:'dhyāyaḥ ||2||

| | |
|---|---|
| वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥३॥ | vaiṣṇavakhaṇḍaḥ \|\|3\|\| badarikāśramamāhātmyam adhyāyaḥ \|\|3\|\| |
| स्कन्द उवाच । | skanda uvāca \| |
| भगवन्सर्वभूतेषु सर्वधर्मविशारद । | bhagavansarvabhūteṣu sarvadharmaviśārada \| |
| अग्नितीर्थस्य माहात्म्यं कृपया वद मे पितः ॥१॥ | agnitīrthasya māhātmyaṃ kṛpayā vada me pitaḥ \|\|1\|\| |
| शिव उवाच । | śiva uvāca \| |
| अतिगुह्यतमं तीर्थं सर्वतीर्थनिषेवितम् । | atiguhyatamaṃ tīrthaṃ sarvatīrthaniṣevitam \| |
| संक्षेपात्कथयाम्येतत्तवादरवशादहम् ॥२॥ | saṃkṣepātkathayāmyetattavādaravaśādaham \|\|2\|\| |
| महापातकिनो ये च अतिपातकिनस्तथा । | mahāpātakino ye ca atipātakinastathā \| |
| स्नानमात्रेण शुद्ध्यंति विनायासेन पुत्रक ॥३॥ | snānamātreṇa śuddhyaṃti vināyāsena putraka \|\|3\|\| |
| प्रायश्चित्तेन यत्पापं न गच्छेन्मरणांतिकम्। | prāyaścittena yatpāpaṃ na gacchenmaraṇāṃtikam\| |
| स्नानमात्रेण तीर्थस्य पावकस्य विशुद्ध्यति ॥४॥ | snānamātreṇa tīrthasya pāvakasya viśuddhyati \|\|4\|\| |
| अत्यंतमलसंबद्धं यथा शुद्ध्यति हाटकम् । | atyaṃtamalasaṃbaddhaṃ yathā śuddhyati hāṭakam \| |
| तथाग्नितीर्थमासाद्य देही पापैर्विशुद्ध्यति ॥५॥ | tathāgnitīrthamāsādya dehī pāpairviśuddhyati \|\|5\|\| |
| कुशाग्रेणोदबिंदुं च पीत्वा वर्षत्रयं नरः । | kuśāgreṇodabiṃduṃ ca pītvā varṣatrayaṃ naraḥ \| |
| अन्यक्षेत्रे तपः कृत्वा तदत्र स्नानमात्रतः ॥६॥ | anyakṣetre tapaḥ kṛtvā tadatra snānamātrataḥ \|\|6\|\| |
| ब्राह्मणान्भोजयित्वास्मिन्यथाविभवसंभवैः । | brāhmaṇānbhojayitvāsminyathāvibhavasaṃbhavaiḥ \| |
| दरिद्रता कुले तेषां न कदाचित्प्रजायते ॥७॥ | daridratā kule teṣāṃ na kadācitprajāyate \|\|7\|\| |
| उपवासेन यः प्राणान्वह्नितीर्थे त्यजेन्नरः । | upavāsena yaḥ prāṇānvahnitīrthe tyajennaraḥ \| |
| स भित्त्वा सूर्यलोकादीन्विष्णुलोकं प्रपद्यते ॥८॥ | sa bhittvā sūryalokādīnviṣṇulokaṃ prapadyate \|\|8\|\| |
| चांद्रायणसहस्रैस्तु कृच्छ्रैः कोटिभिरेव च । | cāṃdrāyaṇasahasraistu kṛcchraiḥ koṭibhireva ca \| |
| यत्फलं लभते मर्त्यस्तत्स्नानाद्वह्नितीर्थतः ॥९॥ | yatphalaṃ labhate martyastatsnānādvahnitīrthataḥ \|\|9\|\| |
| पंचधा ये प्रकुर्वंति पापमस्मिन्षडानन । | paṃcadhā ye prakurvaṃti pāpamasminṣaḍānana \| |
| जपेन पवनायामैर्विशुद्धिरिति मे मतिः ॥१०॥ | japena pavanāyāmairviśuddhiriti me matiḥ \|\|10\|\| |
| ज्ञानेन मोहवशतः पापं कुर्वन्ति येऽधमाः । | jñānena mohavaśataḥ pāpaṃ kurvanti ye:'dhamāḥ \| |
| पैशाचीं योनिमायामति यावदिंद्राश्चतुर्दश ॥११॥ | paiśācīṃ yonimāyāmati yāvadiṃdrāścaturdaśa \|\|11\|\| |
| अनाश्रमी चाश्रमी वा यावद्देहस्यधारणम् । | anāśramī cāśramī vā yāvaddehasyadhāraṇam \| |
| न तीर्थे पावके कुर्यात्पातकं बुद्धिपूर्वकम् ॥१२॥ | na tīrthe pāvake kuryātpātakaṃ buddhipūrvakam \|\|12\|\| |
| स्नानं दानं जपो होमः संध्या देवार्चनं तथा । | snānaṃ dānaṃ japo homaḥ saṃdhyā devārcanaṃ tathā \| |
| अत्रानंतगुणं प्रोक्तमन्यतीर्थात्षडानन ॥१३॥ | atrānaṃtaguṇaṃ proktamanyatīrthātṣaḍānana \|\|13\|\| |
| बहूनि संति तीर्थानि पावनानि महांत्यपि । | bahūni saṃti tīrthāni pāvanāni mahāṃtyapi \| |
| वह्नितीर्थसमं तीर्थं न भूतं न भविष्यति ॥१४॥ | vahnitīrthasamaṃ tīrthaṃ na bhūtaṃ na bhaviṣyati \|\|14\|\| |
| न ब्रह्मा न शिवः शेषो न देवा न च तापसाः । | na brahmā na śivaḥ śeṣo na devā na ca tāpasāḥ \| |
| शक्नुवंति फलं नालं वक्तुं पावकतीर्थजम् ॥१५॥ | śaknuvaṃti phalaṃ nālaṃ vaktuṃ pāvakatīrthajam \|\|15\|\| |
| किं तेषां बहुभिर्यज्ञैः किं दानैर्नियमैर्यमैः। | kiṃ teṣāṃ bahubhiryajñaiḥ kiṃ dānairniyamairyamaiḥ\| |
| येषां पावकतीर्थेऽस्मिन्स्नानं दशदिनं भवेत् ॥१६॥ | yeṣāṃ pāvakatīrthe:'sminsnānaṃ daśadinaṃ bhavet \|\|16\|\| |
| उपवासेन यः प्राणान्वह्नितीर्थे जयेन्नरः । | upavāsena yaḥ prāṇānvahnitīrthe jayennaraḥ \| |
| उपवासत्रयं कृत्वा पूजयित्वा जनार्द्दनम्। | upavāsatrayaṃ kṛtvā pūjayitvā janārddanam\| |
| नरः पावकतीर्थेऽस्मिन्स भवेत्पावकोपमः ॥१७॥ | naraḥ pāvakatīrthe:'sminsa bhavetpāvakopamaḥ \|\|17\|\| |
| शिलापंचकमध्यस्थं सान्निध्यं नित्यदा हरेः । | śilāpaṃcakamadhyasthaṃ sānnidhyaṃ nityadā hareḥ \| |
| तत्रैव पावकं तीर्थं सर्वपापप्रणाशनम् ॥१८॥ | tatraiva pāvakaṃ tīrthaṃ sarvapāpapraṇāśanam \|\|18\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| कथं तत्र शिलाः पंच केन वा तत्र निर्मिताः । | kathaṃ tatra śilāḥ paṃca kena vā tatra nirmitāḥ \| |
| किं पुण्यं किं फलं तासां वक्तुमर्हस्यशेषतः ॥१९॥ | kiṃ puṇyaṃ kiṃ phalaṃ tāsāṃ vaktumarhasyaśeṣataḥ \|\|19\|\| |
| शिव उवाच । | śiva uvāca \| |
| नारदी नारसिंही च वाराही गारुडी तथा । | nāradī nārasiṃhī ca vārāhī gāruḍī tathā \| |
| मार्कंडेयीति विख्याताः शिलाः सर्वार्थसिद्धिदाः ॥२०॥ | mārkaṃḍeyīti vikhyātāḥ śilāḥ sarvārthasiddhidāḥ \|\|20\|\| |
| नारदो भगवांस्तेपे तपः परमदारुणम्। | nārado bhagavāṃstepe tapaḥ paramadāruṇam\| |
| दर्शनार्थं महाविष्णोः शिलायां वायुभोजनः ॥२१॥ | darśanārthaṃ mahāviṣṇoḥ śilāyāṃ vāyubhojanaḥ \|\|21\|\| |

| | |
|---|---|
| षष्टिवर्षसहस्राणि शिलायां वृक्षवृत्तिमान्। | ṣaṣṭivarṣasahasrāṇi śilāyāṃ vṛkṣavṛttimān\| |
| तदासौ भगवान्विष्णुस्तत्र ब्राह्मणरूपधृक् ॥२२॥ | tadāsau bhagavānviṣṇustatra brāhmaṇarūpadhṛk \|\|22\|\| |
| जगाम पुरतस्तस्य कृपया मुनिसत्तमम् । | jagāma puratastasya kṛpayā munisattamam \| |
| उवाच वचनं चारु किमिति क्लिश्यते ह्यृषे । | uvāca vacanaṃ cāru kimiti kliśyate hyṛṣe \| |
| किं वा तवेप्सितं ब्रूहि तपसा क्षीणकल्मष ॥२३॥ | kiṃ vā tavepsitaṃ brūhi tapasā kṣīṇakalmaṣa \|\|23\|\| |
| नारद उवाच । | nārada uvāca \| |
| को भवान्विजनेऽरण्ये ममानुग्रहतत्परः । | ko bhavānvijane:'raṇye mamānugrahatatparaḥ \| |
| मनः प्रसन्नतामेति दर्शनात्ते द्विजोत्तम ॥२४॥ | manaḥ prasannatāmeti darśanātte dvijottama \|\|24\|\| |
| इत्युक्तो नारदेनासौ शंखचक्रगदाधरः । | ityukto nāradenāsau śaṃkhacakragadādharaḥ \| |
| पीतांबरलसत्पद्मवनमालाविभूषणः ॥२५॥ | pītāṃbaralasatpadmavanamālāvibhūṣaṇaḥ \|\|25\|\| |
| श्रीवत्सकौस्तुभभ्राजत्कमलाविमलालयः । | śrīvatsakaustubhabhrājatkamalāvimalālayaḥ \| |
| सुनंदनप्रमुख्यैः स स्तूयमानो जनार्द्दनः ॥२६॥ | sunaṃdanapramukhyaiḥ sa stūyamāno janārddanaḥ \|\|26\|\| |
| दर्शयामास रूपं स्वं नारदाय कृपार्दितः । | darśayāmāsa rūpaṃ svaṃ nāradāya kṛpārditaḥ \| |
| तं दृष्ट्वा सहसोत्थाय तनुं प्राण इवागतः ॥२७॥ | taṃ dṛṣṭvā sahasotthāya tanuṃ prāṇa ivāgataḥ \|\|27\|\| |
| कृतांजलिपुटो भूत्वा नमस्कृत्य पुनः पुनः । | kṛtāṃjaliputo bhūtvā namaskṛtya punaḥ punaḥ \| |
| तुष्टाव प्रणतो भूत्वा जगतामीश्वरेश्वरम् ॥२८॥ | tuṣṭāva praṇato bhūtvā jagatāmīśvareśvaram \|\|28\|\| |
| नारद उवाच । | nārada uvāca \| |
| यः सर्वसाक्षी जगतामधीश्वरो भक्तेच्छया जातशरीरसंपदः । | yaḥ sarvasākṣī jagatāmadhīśvaro bhaktecchayā jātaśarīrasaṃpadaḥ \| |
| कृपामहांभोनिधिराश्रितानां | kṛpāmahāṃbhonidhirāśritānāṃ |
| प्रसीदतां पावनदिव्यमूर्तिः ॥२९॥ | prasīdatāṃ pāvanadivyamūrtiḥ \|\|29\|\| |
| हिताय लोकस्य सतां पुनर्मनः | hitāya lokasya satāṃ punarmanaḥ |
| सुतोषणायाचिरमुत्कलादिभिः । | sutoṣaṇāyāciramutkalādibhiḥ \| |
| प्रसन्नलीलाहसितावलोकनः | prasannalīlāhasitāvalokanaḥ |
| प्रसीदतां सत्त्वनिकायमूर्तिमान् ॥३०॥ | prasīdatāṃ sattvanikāyamūrtimān \|\|30\|\| |
| कंदर्प्पलावण्यविलाससुंदरः | kaṃdarppalāvaṇyavilāsasuṃdaraḥ |
| प्रसन्नगंभीरगिरेंदिरोत्सवः । | prasannagaṃbhīragireṃdirotsavaḥ \| |
| स्वमाश्रितानां वरकल्पपादपः | svamāśritānāṃ varakalpapādapaḥ |
| प्रसीदतां दीनदयार्द्रमानसः ॥३१॥ | prasīdatāṃ dīnadayārdramānasaḥ \|\|31\|\| |
| यदंघ्रिपद्मार्चननिर्मलांतरा | yadaṃghripadmārcananirmalāṃtarā |
| ज्ञानासिना शातितबंधहेतवः । | jñānāsinā śātitabaṃdhahetavaḥ \| |
| विदंति यद्ब्रह्मसुखं गतक्लमाः | vidaṃti yadbrahmasukhaṃ gataklamāḥ |
| प्रसीदतां दीनदयार्द्रमानसः ॥३२॥ | prasīdatāṃ dīnadayārdramānasaḥ \|\|32\|\| |
| संसारवारांनिधिबद्धसेतुर्यः सृष्टिपालांतविधानहेतुः । | saṃsāravārāṃnidhibaddhaseturyaḥ sṛṣṭipālāṃtavidhānahetuḥ \| |
| उपांतनामा गुणलब्धमूर्तिः | upāṃtanāmā guṇalabdhamūrtiḥ |
| प्रसीदतां ब्रह्मसुखानुभूतिः ॥३३॥ | prasīdatāṃ brahmasukhānubhūtiḥ \|\|33\|\| |
| य इंद्रियाधिष्ठितभूतसूक्ष्माद्विकासहेतुर्द्युतिमद्वरिष्ठः । | ya iṃdriyādhiṣṭhitabhūtasūkṣmādvikāsaheturdyutimadvariṣṭhaḥ \| |
| जीवात्मतां गच्छति मायया स्वया स | jīvātmatāṃ gacchati māyayā svayā sa |
| एक ईशो भगवान्प्रसीदताम् ॥३४॥ | eka īśo bhagavānprasīdatām \|\|34\|\| |
| स्वदृग्गुणैर्येन विलिप्यते महान्गुणाश्रयं | svadṛgguṇairyena vilipyate mahānguṇāśrayaṃ |
| येन च पाञ्चभौतिकम् । | yena ca pāñcabhautikam \| |
| एकोऽपि नानागुणसंप्रयुक्तः प्रसीदतां दीनदयालुवर्यः ॥३५॥ | eko:'pi nānāguṇasaṃprayuktaḥ prasīdatāṃ dīnadayāluvaryaḥ \|\|35\|\| |
| यस्यानुवर्तिनो देवा विपदां पदमंबुधिम् । | yasyānuvartino devā vipadāṃ padamaṃbudhim \| |
| कृत्वा वत्सपदं स्वर्गे निरातंका वसंति हि ॥३६॥ | kṛtvā vatsapadaṃ svarge nirātaṃkā vasaṃti hi \|\|36\|\| |
| नमस्ते वासुदेवाय नमः संकर्षणाय च । | namaste vāsudevāya namaḥ saṃkarṣaṇāya ca \| |
| प्रद्युम्नायानिरुद्धाय सर्वभूतात्मने नमः ॥३७॥ | pradyumnāyāniruddhāya sarvabhūtātmane namaḥ \|\|37\|\| |
| अद्य मे जीवितं धन्यमद्य मे सफलं तपः । | adya me jīvitaṃ dhanyamadya me saphalaṃ tapaḥ \| |
| अद्य मे सफलं ज्ञानं दर्शनात्ते जनार्दन ॥३८॥ | adya me saphalaṃ jñānaṃ darśanātte janārdana \|\|38\|\| |
| श्रीभगवानुवाच । | śrībhagavānuvāca \| |

| | |
|---|---|
| तुष्टोऽहं तपसानेन स्तोत्रेण तव नारद । | tuṣṭo:'haṃ tapasānena stotreṇa tava nārada \| |
| त्वत्तो भक्तो न मे कश्चित्त्रिषु लोकेषु विद्यते ॥३९॥ | tvatto bhakto na me kaścittriṣu lokeṣu vidyate \|\|39\|\| |
| वरं वरय भद्रं ते वरदोऽहं तवाग्रतः । | varaṃ varaya bhadraṃ te varado:'haṃ tavāgrataḥ \| |
| मद्दर्शनात्ते कामः स्यात्संसिद्धो विद्धि नारद ॥४०॥ | maddarśanātte kāmaḥ syātsaṃsiddho viddhi nārada \|\|40\|\| |
| नारद उवाच । | nārada uvāca \| |
| वरदो यदि मे देव वरार्हो यदि वाप्यहम् । | varado yadi me deva varārho yadi vāpyaham \| |
| भक्तिं तव पदांभोजे निश्चलां देहि मे विभो ॥४१॥ | bhaktiṃ tava padāṃbhoje niścalāṃ dehi me vibho \|\|41\|\| |
| पच्छिलासन्निधानं च न त्याज्यं ते कदाचन । | pacchilāsannidhānaṃ ca na tyājyaṃ te kadācana \| |
| मत्तीर्थदर्शनात्स्पर्शात्स्नानादाचमनात्तथा । | mattīrthadarśanātsparśātsnānādācamanāttathā \| |
| देहैर्न युज्यते देयस्ततीयस्तु वरो मम ॥४२॥ | dehairna yujyate deyastatīyastu varo mama \|\|42\|\| |
| श्रीभगवानुवाच । | śrībhagavānuvāca \| |
| एवमस्तु तव स्नेहात्तव तीर्थे वसाम्यहम् । | evamastu tava snehāttava tīrthe vasāmyaham \| |
| चराचराणां जंतूनां विदेहाय न संशयः ॥४३॥ | carācarāṇāṃ jaṃtūnāṃ videhāya na saṃśayaḥ \|\|43\|\| |
| एवमुक्त्वा हरिः साक्षात्तत्रैवांतरधीयत । | evamuktvā hariḥ sākṣāttatraivāṃtaradhīyata \| |
| नारदोऽपि महातेजा दिनानि कतिचित्सह । | nārado:'pi mahātejā dināni katicitsaha \| |
| बदरीमावसन्हृष्टो ययौ मधुपुरीं ततः ॥४४॥ | badarīmāvasanhṛṣṭo yayau madhupurīṃ tataḥ \|\|44\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| मार्कंडेयशिलायास्तु महिमानं वदस्व मे । | mārkaṃḍeyaśilāyāstu mahimānaṃ vadasva me \| |
| किं पुण्यं किं फलं तस्याः संज्ञा च तादृशी कथम् ॥४५॥ | kiṃ puṇyaṃ kiṃ phalaṃ tasyāḥ saṃjñā ca tādṛśī katham \|\|45\|\| |
| शिव उवाच । | śiva uvāca \| |
| पुरा त्रेतायुगस्यांते मृकंडुतनयो महान् । | purā tretāyugasyāṃte mṛkaṃḍutanayo mahān \| |
| स्वल्पायुषं निजं ज्ञात्वा जजाप परमं जपम् ॥४६॥ | svalpāyuṣaṃ nijaṃ jñātvā jajāpa paramaṃ japam \|\|46\|\| |
| द्वादशाक्षरमंत्रेण पूजितो हरिरव्ययः । | dvādaśākṣaramaṃtreṇa pūjito hariravyayaḥ \| |
| सप्तकल्पायुषं ज्ञात्वा तत्रैवांतरतो ययौ ॥४७॥ | saptakalpāyuṣaṃ jñātvā tatraivāṃtarato yayau \|\|47\|\| |
| मार्कंडेयस्ततः श्रुत्वा तीर्थाटनपरिश्रमम् । | mārkaṃḍeyastataḥ śrutvā tīrthāṭanapariśramam \| |
| दर्शनं नारदस्यासीन्मथुरायां षडानन ॥४८॥ | darśanaṃ nāradasyāsīnmathurāyāṃ ṣaḍānana \|\|48\|\| |
| पूजितो वंदितस्तेन नारदो मुनिसत्तमः । | pūjito vaṃditastena nārado munisattamaḥ \| |
| कथयामास माहात्म्यं बदर्या यत्र केशवः ॥४९॥ | kathayāmāsa māhātmyaṃ badaryā yatra keśavaḥ \|\|49\|\| |
| नारद उवाच । | nārada uvāca \| |
| किमिति क्लिश्यते साधो तीर्थाटनपरिश्रमैः । | kimiti kliśyate sādho tīrthāṭanapariśramaiḥ \| |
| बदर्याख्यं महाक्षेत्रं सान्निध्यं नित्यदा हरेः ॥५०॥ | badaryākhyaṃ mahākṣetraṃ sānnidhyaṃ nityadā hareḥ \|\|50\|\| |
| तत्र याहि यत्र साक्षाद्धरिं पश्यसि चक्षुषा । | tatra yāhi yatra sākṣāddhariṃ paśyasi cakṣuṣā \| |
| तच्छ्रुत्वा विस्मयोपेतो विशालामाययावृषिः ॥५१॥ | tacchrutvā vismayopeto viśālāmāyayāvṛṣiḥ \|\|51\|\| |
| स्नात्वा शिलामुपविशञ्जजापाष्टाक्षरं परम् । | snātvā śilāmupaviśañjajāpāṣṭākṣaraṃ param \| |
| ततःप्रसन्नो भगवाँस्त्रिरात्र्यंते जनार्दनः ॥५२॥ | tataḥprasanno bhagavām̐strirātryaṃte janārdanaḥ \|\|52\|\| |
| शंखचक्रगदापद्मवनमालाविभूषणम् । | śaṃkhacakragadāpadmavanamālāvibhūṣaṇam \| |
| तं दृष्ट्वा सहसोत्थाय प्रेमगद्गदया गिरा । | taṃ dṛṣṭvā sahasotthāya premagadgadayā girā \| |
| तुष्टाव प्रणतो भूत्वा मार्कंडेयो जनार्दनम् ॥५३॥ | tuṣṭāva praṇato bhūtvā mārkaṃḍeyo janārdanam \|\|53\|\| |
| मार्कंडेय उवाच । | mārkaṃḍeya uvāca \| |
| अशाश्वते च संसारे सारे ते चरणांबुजे । | aśāśvate ca saṃsāre sāre te caraṇāṃbuje \| |
| समुद्धारः कथं नृणां त्राहि मां परमेश्वर ॥५४॥ | samuddhāraḥ kathaṃ nṛṇāṃ trāhi māṃ parameśvara \|\|54\|\| |
| तापत्रयपरिश्रांतमनेकाज्ञानजृंभितम् । | tāpatrayapariśrāṃtamanekājñānajṛṃbhitam \| |
| संसारकुहरे भ्रांतं त्राहि मां कृपयाऽच्युत ॥५५॥ | saṃsārakuhare bhrāṃtaṃ trāhi māṃ kṛpayā:'cyuta \|\|55\|\| |
| अनेकयोनियंत्रेषु निःसृतेस्तनुवेदनाम् । | anekayoniyaṃtreṣu niḥsṛtestanuvedanām \| |
| गर्भवासकृतां प्राप्तं त्राहि मां करुणांबुधे ॥५६॥ | garbhavāsakṛtāṃ prāptaṃ trāhi māṃ karuṇāṃbudhe \|\|56\|\| |
| कृमिभक्षितसर्वांगं क्षुत्पिपासाकुलं च हि । | kṛmibhakṣitasarvāṃgaṃ kṣutpipāsākulaṃ ca hi \| |
| आंत्रमालाकुलेगर्भे त्राहि मां मधुसूदन ॥५७॥ | āṃtramālākulegarbhe trāhi māṃ madhusūdana \|\|57\|\| |
| अमेध्यादिभिरालिप्तं निश्चेष्टश्रममाकुलम्। | amedhyādibhirāliptaṃ niśceṣṭaśramamākulam\| |

स्मरंतं निजकर्मोत्थं त्राहि मां मधुसूदन ॥५८॥
वचनादाननिःश्वासाशक्तं भयमुपागतम्।
गर्भवासमहादुःखं त्राहि मां मधुसूदन ॥५९॥
जरामरणबाल्यादिदुःखसंसारपीडितम् ।
दुःखाब्धौ सुखबुद्धिं मां कृपासिंधो प्रपालय ॥६०॥
कदाचित्कृमितां प्राप्तं कदाचित्स्वेदजन्मिताम्।
कदाचिदुद्भिज्जत्वं च कदाचिन्नरतां गतम् ॥६१॥
सर्वयोनिसमापन्नं विपन्नं विगतप्रभम्।
अनाथं त्वां समापन्नं त्राहि मां कृपयाऽच्युत॥६२॥
एवं स्तुतस्ततः कृष्णो मार्कण्डेयेन धीमता ।
प्रीतस्तमाह विप्रर्षे वरं मे व्रियतामिति ॥६३॥
श्रीमार्कंडेय उवाच ।
यदि तुष्टो भवान्मह्यं भगवन्दीनवत्सल ।
निश्चलां देहि मे भक्तिं पूजायां दर्शने तव ।
शिलायां तव सान्निध्यमेष एव वरो मम ॥६४॥
सूत उवाच ।
तथेत्युक्त्वा महाविष्णुर्ययावंतर्हितं द्विज ।
मार्कंडेयस्ततस्तुष्टो जगाम पितुराश्रमम् ॥६५॥
उपस्थानमिदं पुण्यं सर्वपापप्रणाशनम् ।
श्रृणुयाच्छ्रावयेन्मर्त्यो गोविन्दे लभते गतिम् ॥६६॥

smaraṃtaṃ nijakarmotthaṃ trāhi māṃ madhusūdana ||58||
vacanādānaniḥśvāsāśaktaṃ bhayamupāgatam|
garbhavāsamahāduḥkhaṃ trāhi māṃ madhusūdana ||59||
jarāmaraṇabālyādiduḥkhasaṃsārapīḍitam |
duḥkhābdhau sukhabuddhiṃ māṃ kṛpāsiṃdho prapālaya ||60||
kadācitkṛmitāṃ prāptaṃ kadācitsvedajanmitām|
kadācidudbhijjatvaṃ ca kadācinnaratāṃ gatam ||61||
sarvayonisamāpannaṃ vipannaṃ vigataprabham|
anāthaṃ tvāṃ samāpannaṃ trāhi māṃ kṛpayā:'cyuta||62||
evaṃ stutastataḥ kṛṣṇo mārkaṇḍeyena dhīmatā |
prītastamāha viprarṣe varaṃ me vriyatāmiti ||63||
śrīmārkaṃḍeya uvāca |
yadi tuṣṭo bhavānmahyaṃ bhagavandīnavatsala |
niścalāṃ dehi me bhaktiṃ pūjāyāṃ darśane tava |
śilāyāṃ tava sānnidhyameṣa eva varo mama ||64||
sūta uvāca |
tathetyuktvā mahāviṣṇuryayāvaṃtarhitaṃ dvija |
mārkaṃḍeyastatastuṣṭo jagāma piturāśramam ||65||
upasthānamidaṃ puṇyaṃ sarvapāpapraṇāśanam |
śṛṇuyācchrāvayenmartyo govinde labhate gatim ||66||

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां द्वितीये वैष्णवखण्डे शिवकार्तिकेयसंवादे
अग्नितीर्थनारदशिलामार्कण्डेयशिलामाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥३॥

iti śrīskāṃde mahāpurāṇa ekāśītisāhasryāṃ
saṃhitāyāṃ dvitīye vaiṣṇavakhaṇḍe śivakārtikeyasaṃvāde
agnitīrthanāradaśilāmārkaṇḍeyaśilāmāhātmyavarṇanaṃnāma tṛtīyo:'dhyāyaḥ ||3||

वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥४॥
स्कन्द उवाच ।
वैनतेयशिलायास्तु माहात्म्यं वद मे पितः ।
किं पुण्यं किं फलं चास्य अनुभावं च किं भवेत् ॥१॥
शिव उवाच ।
कश्यपाद्विनतागर्भे महाबलपराक्रमौ ।
गरुडारुणौ प्रजातौ द्वावरुणः सूर्यसारथिः ॥२॥
बदर्य्या दक्षिणे भागे गन्धमादनश‍ृङ्गके ।
गरुडस्तप आतेपे हरिवाहनकाम्यया ॥३॥
फलमूलजलाहारो निर्द्वंद्वो जपतां वरः ।
पदैकेनोपसंक्रम्य भुवि जेपे निरामयः ॥४॥
त्रिंशद्वर्षसहस्राणि हरिदर्शन लालसः ।
ततस्तु भगवान्साक्षात्पीतवासा निजायुधः ॥५॥
आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ।
उवाच वचनं सम्यङ्मेघगंभीरनिस्वनः ॥६॥
तथापि न बहिर्वृत्तिर्दध्मौ दरवरं ततः ।
तथापि न बहिर्वृत्तिर्गरुडस्य महात्मनः ॥७॥
ततः प्रविश्य भगवानंतरं पवनक्रमात् ।
बहिरुन्मुखतां चैव रचयन्बहिराबभौ ॥८॥
भगवंतं हरिं दृष्ट्वा गरुडो गतसाध्वसः ।
पुलकांकित सर्वांगस्तुष्टाव विहितांजलिः ॥९॥
गरुड उवाच ।
जयजय त्रिभुवनजनमनोभवन
विदलिताघगुण सकलगीर्वाणवंदित
चरणकमलयुगलपरिमलबहलरिपुवनविभंजन
विद्योतमान सकलसुरासुरमुकुटकोटिविलसित
निजपीठकमलनिरसित निजजनहृदयतिमिरपटलबहल
हिमकर इव त्रिविधसंतापसंदोहहरणचरण
जगदुदयस्थितिलयविलासविलसित
त्रिविधमूर्तिकीर्तिविस्फूर्जित जगदुदयसंदोह
दिनकर इव निजजनमानससरोजषट्पदविदित
सकलवेदविद्योतमान मानस
निजजनमुनिजनवन्दित पदनखनीरपवित्रीकृत
गीर्वाणमुनिमानसवंदित चरणरजःप्रसादसारभूत
जगतामधीश नमस्ते नमस्ते ॥१०॥
अपि च ।
अष्टशक्तिसहितो वनमाली पीतचैलकुसुमावलिशोभः ।
पंकजाकरविराजितपादः पातु मामवहितेन्द्रियवर्गः ॥११॥
भक्तहृत्कमलराजितमूर्तिर्दुष्टदैत्यदलनोत्थितकीर्तिः ।
बद्धसेतुरविताश्रितलोकः पातु मामनुदिनं भुवनेशः ॥१२॥
स्थिरचलत्रिविधतापहिमांशुर्भासमानतरणिप्रतिभासः ।
एक एव बहुधा कृतवेषो माययावतु महामतिरीशः ॥१३॥
भक्तचिंतनकृते कृतरूपः शैशवेन बहुशासितभूपः ।
वेदमार्ग उरुधा हितकारी रीतिरीशितुरियं गुणशाली ॥१४॥
यज्ञभुग्घृदयबंधनधारी विश्वमूर्तिरबलांशुकहारी।
पालनेऽपि महतां बहुदेहो रास एष तनुमानवतान्नः ॥१५॥
प्रेमभक्तिपुरुषैरुपलभ्यः पूरुषः कृतसमस्तनिवासः ।
दास्यवृंदहृषितो निजदासः

vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||4||
skanda uvāca |
vainateyaśilāyāstu māhātmyaṃ vada me pitaḥ |
kiṃ puṇyaṃ kiṃ phalaṃ cāsya anubhāvaṃ ca kiṃ bhavet ||1||
śiva uvāca |
kaśyapādvinatāgarbhe mahābalaparākramau |
garuḍāruṇau prajātau dvāvaruṇaḥ sūryasārathiḥ ||2||
badaryyā dakṣiṇe bhāge gandhamādanaśṛṅgake |
garuḍastapa ātepe harivāhanakāmyayā ||3||
phalamūlajalāhāro nirdvaṃdvo japatāṃ varaḥ |
padaikenopasaṃkramya bhuvi jepe nirāmayaḥ ||4||
triṃśadvarṣasahasrāṇi haridarśana lālasaḥ |
tatastu bhagavānsākṣātpītavāsā nijāyudhaḥ ||5||
āvirāsīdyathā prācyāṃ diśīṃduriva puṣkalaḥ |
uvāca vacanaṃ samyaṅmeghagaṃbhīranisvanaḥ ||6||
tathāpi na bahirvṛttirdadhmau daravaraṃ tataḥ |
tathāpi na bahirvṛttirgaruḍasya mahātmanaḥ ||7||
tataḥ praviśya bhagavānaṃtaraṃ pavanakramāt |
bahirunmukhatāṃ caiva racayanbahirābabhau ||8||
bhagavaṃtaṃ hariṃ dṛṣṭvā garuḍo gatasādhvasaḥ |
pulakāṃkita sarvāṃgastuṣṭāva vihitāṃjaliḥ ||9||
garuḍa uvāca |
jayajaya tribhuvanajanamanobhavana
vidalitāghaguṇa sakalagīrvāṇavaṃdita
caraṇakamalayugalaparimalabahalaripuvanavibhaṃjana
vidyotamāna sakalasurāsuramukuṭakoṭivilasita
nijapīṭhakamalanirasita nijajanahṛdayatimirapaṭalabahala
himakara iva trividhasaṃtāpasaṃdohaharaṇacaraṇa
jagadudayasthitilayavilāsavilasita
trividhamūrtikīrtivisphūrjita jagadudayasaṃdoha
dinakara iva nijajanamānasasarojaṣaṭpadavidita
sakalavedavidyotamāna mānasa
nijajanamunijanavandita padanakhanīrapavitrīkṛta
gīrvāṇamunimānasavaṃdita caraṇarajaḥprasādasārabhūta
jagatāmadhīśa namaste namaste ||10||
api ca |
aṣṭaśaktisahito vanamālī pītacailakusumāvaliśobhaḥ |
paṃkajākaravirājitapādaḥ pātu māmavahitendriyavargaḥ ||11||
bhaktahṛtkamalarājitamūrtirduṣṭadaityadalanotthitakīrtiḥ |
baddhaseturavitāśritalokaḥ pātu māmanudinaṃ bhuvaneśaḥ ||12||
sthiracalatrividhatāpahimāṃśurbhāsamānataraṇipratibhāsaḥ |
eka eva bahudhā kṛtaveṣo māyayāvatu mahāmatirīśaḥ ||13||
bhaktaciṃtanakṛte kṛtarūpaḥ śaiśavena bahuśāsitabhūpaḥ |
vedamārga urudhā hitakārī rītirīśituriyaṃ guṇaśālī ||14||
yajñabhugghṛdayabaṃdhanadhārī viśvamūrtirabalāṃśukahārī|
pālane:'pi mahatāṃ bahudeho rāsa eṣa tanumānavatānnaḥ ||15||
premabhaktipuruṣairupalabhyaḥ pūruṣaḥ kṛtasamastanivāsaḥ |
dāsyavṛṃdahṛṣito nijadāsaḥ

| | |
|---|---|
| प्रेक्षणैककरुणोवतु विश्वम् ॥१६॥ | prekṣaṇaikakaruṇovatu viśvam \|\|16\|\| |
| कंठलंबिततरक्षुनखाग्रक्रुष्टगोपरमणीकुचभारः। | kaṃṭhalaṃbitatarakṣunakhāgrakruṣṭagoparamaṇīkucabhāraḥ\| |
| लीलया युवतिभिः कृतवेषः शेष एष भवतादुपशांत्यै॥१७॥ | līlayā yuvatibhiḥ kṛtaveṣaḥ śeṣa eṣa bhavatādupaśāṃtyai\|\|17\|\| |
| दंडपाणिरयमेव जनानां शासितात्मनियमोक्तहितानाम्। | daṃḍapāṇirayameva janānāṃ śāsitātmaniyamoktahitānām\| |
| पावनाय महतामनुशाली विश्वदुःखशमनो भवतान्नः ॥१८॥ | pāvanāya mahatāmanuśālī viśvaduḥkhaśamano bhavatānnaḥ \|\|18\|\| |
| एवं स्तुतस्ततः साक्षाद्गरुडेन महात्मना । | evaṃ stutastataḥ sākṣādgaruḍena mahātmanā \| |
| पूजार्थमाजुहावैनां गंगां त्रिपथगामिनीम् ॥१९॥ | pūjārthamājuhāvaināṃ gaṃgāṃ tripathagāminīm \|\|19\|\| |
| ततः पंचमुखी साक्षादाविरासीन्नगोपरि । | tataḥ paṃcamukhī sākṣādāvirāsīnnagopari \| |
| तेनोदकेन पादार्घं चकार विनतासुतः ॥२०॥ | tenodakena pādārghaṃ cakāra vinatāsutaḥ \|\|20\|\| |
| व्रियतां वर इत्युक्तो गरुडो हरिणा ततः । | vriyatāṃ vara ityukto garuḍo hariṇā tataḥ \| |
| तवैकवाहनः श्रीमान्बलवीर्यपराक्रमः । | tavaikavāhanaḥ śrīmānbalavīryaparākramaḥ \| |
| अजेयो देवदैत्यानां स्यामहं ते प्रसादतः ॥२१॥ | ajeyo devadaityānāṃ syāmahaṃ te prasādataḥ \|\|21\|\| |
| इयं मन्नामविख्याता सर्वपापहरा शिला । | iyaṃ mannāmavikhyātā sarvapāpaharā śilā \| |
| एतस्याः स्मरणात्पुंसां विषव्याधिर्न जायताम् ॥२२॥ | etasyāḥ smaraṇātpuṃsāṃ viṣavyādhirna jāyatām \|\|22\|\| |
| एवमुक्त्वा ततस्तूष्णीं बभूव विनतासुतः । | evamuktvā tatastūṣṇīṃ babhūva vinatāsutaḥ \| |
| ओमित्युक्त्वा ततो विष्णुरुवाचेदं वचो हितम् ॥२३॥ | omityuktvā tato viṣṇuruvācedaṃ vaco hitam \|\|23\|\| |
| बदरीं त्वं प्रयाहीति नारदेन निषेविताम् । | badarīṃ tvaṃ prayāhīti nāradena niṣevitām \| |
| स्नानं नारदतीर्थादावुपवासत्रयं शुचिः । | snānaṃ nāradatīrthādāvupavāsatrayaṃ śuciḥ \| |
| कृत्वा मद्दर्शनं तत्र सुलभं ते भविष्यति ॥२४॥ | kṛtvā maddarśanaṃ tatra sulabhaṃ te bhaviṣyati \|\|24\|\| |
| इत्युक्त्वांतर्द्दधे विष्णुस्तडित्सौदामनी यथा । | ityuktvāṃtarddadhe viṣṇustaḍitsaudāmanī yathā \| |
| गरुडस्तु ततः शीघ्रमागत्य बदरीं मुदा ॥२५॥ | garuḍastu tataḥ śīghramāgatya badarīṃ mudā \|\|25\|\| |
| वह्नितीर्थं समासाद्य शिलामाश्रित्य तत्परः । | vahnitīrthaṃ samāsādya śilāmāśritya tatparaḥ \| |
| स्नात्वा नारदतीर्थेषु व्रतचर्यामथाकरोत् ॥२६॥ | snātvā nāradatīrtheṣu vratacaryāmathākarot \|\|26\|\| |
| ततस्तु नारदे तीर्थे दृष्ट्वा भगवतः स्थितिम् । | tatastu nārade tīrthe dṛṣṭvā bhagavataḥ sthitim \| |
| नमस्कृत्य विधानेन तदाज्ञातः पुरं ययौ ॥२७॥ | namaskṛtya vidhānena tadājñātaḥ puraṃ yayau \|\|27\|\| |
| ततः प्रभृति त्रैलोक्ये गारुडीति शिलोच्यते ॥२८॥ | tataḥ prabhṛti trailokye gāruḍīti śilocyate \|\|28\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| वाराह्या वद माहात्म्यं कीदृशं हीश्वरेश्वर । | vārāhyā vada māhātmyaṃ kīdṛśaṃ hīśvareśvara \| |
| किं पुण्यं किं फलं तस्या अभिधानं तथा कथम् ॥२९॥ | kiṃ puṇyaṃ kiṃ phalaṃ tasyā abhidhānaṃ tathā katham \|\|29\|\| |
| शिव उवाच । | śiva uvāca \| |
| रसातलात्समुद्धृत्य महीं दैवतवैरिणम् । | rasātalātsamuddhṛtya mahīṃ daivatavairiṇam \| |
| हिरण्याक्षं रणे हत्वा बदरीं समुपागतः ॥३०॥ | hiraṇyākṣaṃ raṇe hatvā badarīṃ samupāgataḥ \|\|30\|\| |
| आकल्पांतं महादेवो योगधारणया स्थितः । | ākalpāṃtaṃ mahādevo yogadhāraṇayā sthitaḥ \| |
| बदर्याः सौष्ठवादेव विदधे स्थितिमात्मनः ॥३१॥ | badaryāḥ sauṣṭhavādeva vidadhe sthitimātmanaḥ \|\|31\|\| |
| शिलारूपेण भगवान्स्थितिं तत्र चकार ह । | śilārūpeṇa bhagavānsthitiṃ tatra cakāra ha \| |
| तत्र गत्वा तु मनुजः स्नात्वा गंगाजलेऽमले ॥३२॥ | tatra gatvā tu manujaḥ snātvā gaṃgājale:'male \|\|32\|\| |
| दानं दत्त्वा स्वशक्त्या वै गंगांभः शांतमानसः । | dānaṃ dattvā svaśaktyā vai gaṃgāṃbhaḥ śāṃtamānasaḥ \| |
| अहोरात्रे स्थितो भूत्वा जपेदेकाग्रमानसः ॥३३॥ | ahorātre sthito bhūtvā japedekāgramānasaḥ \|\|33\|\| |
| शिलायां देवदृष्टिश्च तस्य पुंसः प्रजायते । | śilāyāṃ devadṛṣṭiśca tasya puṃsaḥ prajāyate \| |
| बहुना किमिहोक्तेन यद्वदिष्यति साधकः ॥३४॥ | bahunā kimihoktena yadvadiṣyati sādhakaḥ \|\|34\|\| |
| तत्तस्य सिध्यति क्षिप्रं यद्यपि स्यात्सुदुष्करम् ॥३५॥ | tattasya sidhyati kṣipraṃ yadyapi syātsuduṣkaram \|\|35\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| नारसिंहीशिलायास्तु माहात्म्यं वद मे प्रभो । | nārasiṃhīśilāyāstu māhātmyaṃ vada me prabho \| |
| त्वत्प्रसादान्महादेव दुर्लभं श्रुतवानहम् ॥३६॥ | tvatprasādānmahādeva durllabhaṃ śrutavānaham \|\|36\|\| |
| शिव उवाच । | śiva uvāca \| |
| हिरण्यकशिपुं हत्वा नखाग्रेणैव लीलया । | hiraṇyakaśipuṃ hatvā nakhāgreṇaiva līlayā \| |
| क्रोधाग्निना प्रदीप्तांगः प्रलयानलसन्निभः ॥३७॥ | krodhāgninā pradīptāṃgaḥ pralayānalasannibhaḥ \|\|37\|\| |
| तदा देवैः समागत्य स्थित्वा दूरे दयालुभिः । | tadā devaiḥ samāgatya sthitvā dūre dayālubhiḥ \| |

| | |
|---|---|
| स्तुतोऽसौ भगवान्देवो लीलया धृतविग्रहः ॥३८॥ | stuto:'sau bhagavāndevo līlayā dhṛtavigrahaḥ \|\|38\|\| |
| तदा प्रसन्नो हरिरुग्रविक्रमः स्वतेजसा व्याप्तसुरासुरोत्तमः । | tadā prasanno harirugravikramaḥ svatejasā vyāptasurāsurottamaḥ \| |
| उवाच मत्तो वरमावृणीध्वं | uvāca matto varamāvṛṇīdhvaṃ |
| गीर्वाणनिर्वाण सुखैकहेतुम् ॥३९॥ | gīrvāṇanirvāṇa sukhaikahetum \|\|39\|\| |
| तदासुराणामधिपः स्वयंभूरुवाच वाक्यं स्मितशोभिताननः । | tadāsurāṇāmadhipaḥ svayaṃbhūruvāca vākyaṃ smitaśobhitānanaḥ \| |
| रूपं तवात्युग्रमशेषदेहिनां | rūpaṃ tavātyugramaśeṣadehināṃ |
| भयावहं संहर नारसिंह ॥४०॥ | bhayāvahaṃ saṃhara nārasiṃha \|\|40\|\| |
| अनेकधैतद्विधिवद्विधाय निधाय शैलादिषु दिव्यमूर्तिम् । | anekadhaitadvidhivadvidhāya nidhāya śailādiṣu divyamūrtim \| |
| उवाच किं वः प्रकरोमि कृत्यमहं | uvāca kiṃ vaḥ prakaromi kṛtyamahaṃ |
| प्रसन्नस्त्रिदशाः परंतपाः ॥४१॥ | prasannastridaśāḥ paraṃtapāḥ \|\|41\|\| |
| ततोमरा ऊचुरनेन चैव रूपेण संक्षोभितविश्वमूर्ते । | tatomarā ūcuranena caiva rūpeṇa saṃkṣobhitaviśvamūrte \| |
| प्रशांतमंतःसुखहेतुबंधि | praśāṃtamaṃtaḥsukhahetubaṃdhi |
| चतुर्भुजत्वं वरमीप्सितं नः ॥४२॥ | caturbhujatvaṃ varamīpsitaṃ naḥ \|\|42\|\| |
| ततो हरिर्वीक्ष्य निरीक्षणेन दिव्येन विश्वं प्रययौ विशालाम्। | tato harirvīkṣya nirīkṣaṇena divyena viśvaṃ prayayau viśālām\| |
| गंगाजले क्रीडति विष्टचेताः | gaṃgājale krīḍati viṣṭacetāḥ |
| सुरासुरेभ्यो भगवानुवाच ॥४३॥ | surāsurebhyo bhagavānuvāca \|\|43\|\| |
| ततोऽमराः शांतभया अथैनं | tato:'marāḥ śāṃtabhayā athainaṃ |
| निरीक्ष्य देवं जलमध्यसंस्थम् । | nirīkṣya devaṃ jalamadhyasaṃstham \| |
| नत्वा परिक्रम्य तदा समाययुर्निरूढभावाः | natvā parikramya tadā samāyayurnirūḍhabhāvāḥ |
| स्वपुरं ततः क्रमात् ॥४४॥ | svapuraṃ tataḥ kramāt \|\|44\|\| |
| ततः समस्ता ऋषयस्तपोधनाः समाययुर्भक्तिभरावनम्राः । | tataḥ samastā ṛṣayastapodhanāḥ samāyayurbhaktibharāvanamrāḥ \| |
| नृसिंहमत्यद्भुतविकमं हरिं | nṛsiṃhamatyadbhutavikamaṃ hariṃ |
| समीडिरे बद्धकरा वचोभिः ॥४५॥ | samīḍire baddhakarā vacobhiḥ \|\|45\|\| |
| ऋषय ऊचुः । | ṛṣaya ūcuḥ \| |
| नमोनमस्ते जगतामधीश विश्वेश विश्वाभय विश्वमूर्ते । | namonamaste jagatāmadhīśa viśveśa viśvābhaya viśvamūrte \| |
| कृपांबुराशे भजनीयतीर्थ पादांबुज | kṛpāṃburāśe bhajanīyatīrtha pādāṃbuja |
| श्रीश दयां विधेहि ॥४६॥ | śrīśa dayāṃ vidhehi \|\|46\|\| |
| एकोऽसि नाना निजमायया | eko:'si nānā nijamāyayā svayā |
| स्वया घटे पयो यद्वदुपाधिभिन्नम् । | ghaṭe payo yadvadupādhibhinnam \| |
| भक्तेच्छयोपात्तविचित्रविग्रह | bhaktecchayopāttavicitravigraha |
| प्रसीद विश्वानन विश्वभावन ॥४७॥ | prasīda viśvānana viśvabhāvana \|\|47\|\| |
| ततः प्रसन्नो भगवान्नृसिंहः सिंहविक्रमः । | tataḥ prasanno bhagavānnṛsiṃhaḥ siṃhavikramaḥ \| |
| उवाच वचनं चारु वरं मे व्रियतामिति ॥४८॥ | uvāca vacanaṃ cāru varaṃ me vriyatāmiti \|\|48\|\| |
| ऋषय ऊचुः । | ṛṣaya ūcuḥ \| |
| यदि प्रसन्नो भगवन्कृपया जगतां पते । | yadi prasanno bhagavankṛpayā jagatāṃ pate \| |
| विशाला न परित्याज्या वरोऽस्माकमभीप्सितः ॥४९॥ | viśālā na parityājyā varo:'smākamabhīpsitaḥ \|\|49\|\| |
| एवमस्तु ततः सर्वे स्वाश्रमं ह्यृषयो ययुः । | evamastu tataḥ sarve svāśramaṃ hyṛṣayo yayuḥ \| |
| नृसिंहोऽपि शिलारूपी जलक्रीडापरोऽभवत् ॥५०॥ | nṛsiṃho:'pi śilārūpī jalakrīḍāparo:'bhavat \|\|50\|\| |
| उपवासत्रयं कृत्वा जपध्यानपरायणः । | upavāsatrayaṃ kṛtvā japadhyānaparāyaṇaḥ \| |
| नृसिंहरूपिणं साक्षात्पश्यत्येव न संशयः ॥५१॥ | nṛsiṃharūpiṇaṃ sākṣātpaśyatyeva na saṃśayaḥ \|\|51\|\| |
| य एतच्छ्रद्धया मर्त्यः श्रृणोति श्रावयञ्छुचिः । | ya etacchraddhayā martyaḥ śrṇoti śrāvayañchuciḥ \| |
| सर्वपापविनिर्मुक्तो वैकुंठे वसतिं लभेत्॥५२॥ | sarvapāpavinirmukto vaikuṃṭhe vasatiṃ labhet\|\|52\|\| |

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे गरुडशिला
वाराहीशिला नारसिंहीशिलामाहात्म्यवर्णनंनाम चतुर्थोऽध्यायः ॥४॥

iti śrīskāṃde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ
dvitīye vaiṣṇavakhaṇḍe badarikāśramamāhātmye śivakārttikeyasaṃvāde garuḍaśilā
vārāhīśilā nārasiṃhīśilāmāhātmyavarṇanaṃnāma caturtho:'dhyāyaḥ \|\|4\|\|

| | |
|---|---|
| वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥५॥ | vaiṣṇavakhaṇḍaḥ \|\|3\|\| badarikāśramamāhātmyam adhyāyaḥ \|\|5\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| किमर्थं भगवांस्तत्र वसति श्रद्धया पुनः । | kimarthaṃ bhagavāṃstatra vasati śraddhayā punaḥ \| |
| किं पुण्यं किं फलं तस्य दर्शनस्पर्शनादिभिः ॥१॥ | kiṃ puṇyaṃ kiṃ phalaṃ tasya darśanasparśanādibhiḥ \|\|1\|\| |
| नैवेद्यभक्षणं चापि महापूजाकृतेस्तथा । | naivedyabhakṣaṇaṃ cāpi mahāpūjākṛtestathā \| |
| प्रदक्षिणस्य च फलं ब्रूहि मे कृपया पितः ॥२॥ | pradakṣiṇasya ca phalaṃ brūhi me kṛpayā pitaḥ \|\|2\|\| |
| शिव उवाच । | śiva uvāca \| |
| पुरा कृतयुगस्यादौ सर्वभूतहिताय च । | purā kṛtayugasyādau sarvabhūtahitāya ca \| |
| मूर्तिमान्भगवांस्तत्र तपोयोगसमाश्रितः ॥३॥ | mūrtimānbhagavāṃstatra tapoyogasamāśritaḥ \|\|3\|\| |
| त्रेतायुगे ह्यृषिगणैर्योगाभ्यासैकतत्परः । | tretāyuge hyṛṣigaṇairyogābhyāsaikatatparaḥ \| |
| द्वापरे समनुप्राप्ते ज्ञाननिष्ठो हि दुर्लभः ॥४॥ | dvāpare samanuprāpte jñānaniṣṭho hi durlabhaḥ \|\|4\|\| |
| ऋषीणां देवतानां च दुर्दर्शो भगवानभूत् । | ṛṣīṇāṃ devatānāṃ ca durdarśo bhagavānabhūt \| |
| ततो ह्यृषिगणा देवा अलभ्य भगवद्गतिम् ॥५॥ | tato hyṛṣigaṇā devā alabhya bhagavadgatim \|\|5\|\| |
| स्वायंभुवं पदं याता विस्मयाकुलचेतसः । | svāyaṃbhuvaṃ padaṃ yātā vismayākulacetasaḥ \| |
| तत्र गत्वा नमस्कृत्य ऊचुर्लोकेश्वरं मुदा । | tatra gatvā namaskṛtya ūcurlokeśvaraṃ mudā \| |
| बृहस्पतिं पुरस्कृत्य ऋषयश्च तपोधनाः ॥६॥ | bṛhaspatiṃ puraskṛtya ṛṣayaśca tapodhanāḥ \|\|6\|\| |
| देवा ऊचुः । | devā ūcuḥ \| |
| नमस्ते सर्वलोकानामाश्रयः शरणार्तिहा । | namaste sarvalokānāmāśrayaḥ śaraṇārtihā \| |
| वृत्तिदः करुणापूर्णः पितामह सुरेश्वर । | vṛttidaḥ karuṇāpūrṇaḥ pitāmaha sureśvara \| |
| निवेदनीया विपदः समुद्धर्ता पितासि नः ॥७॥ | nivedanīyā vipadaḥ samuddhartā pitāsi naḥ \|\|7\|\| |
| ब्रह्मोवाच । | brahmovāca \| |
| किमर्थमागता यूयं विस्मयाकुलमानसाः । | kimarthamāgatā yūyaṃ vismayākulamānasāḥ \| |
| मिलिता ऋषिभिः साकं ब्रूतागमनकारणम् ॥८॥ | militā ṛṣibhiḥ sākaṃ brūtāgamanakāraṇam \|\|8\|\| |
| देवा ऊचुः । | devā ūcuḥ \| |
| द्वापरे समनुप्राप्ते विशालायां विशालधीः । | dvāpare samanuprāpte viśālāyāṃ viśāladhīḥ \| |
| भगवान्दृश्यते नैव तत्र किं कारणं वद ॥९॥ | bhagavāndṛśyate naiva tatra kiṃ kāraṇaṃ vada \|\|9\|\| |
| विशाला किं परित्यक्ता ततो वा क्व गतः स्वयम् । | viśālā kiṃ parityaktā tato vā kva gataḥ svayam \| |
| अपराधादुतास्माकं कथं चासौ प्रसीदति ॥१०॥ | aparādhādutāsmākaṃ kathaṃ cāsau prasīdati \|\|10\|\| |
| ब्रह्मोवाच । | brahmovāca \| |
| नाहमेतद्विजानामि श्रुतं चाद्य मुखाद्धि वः । | nāhametadvijānāmi śrutaṃ cādya mukhāddhi vaḥ \| |
| को हेतुर्दृक्पथातीतो भगवान्भवतां सुराः । | ko heturdṛkpathātīto bhagavānbhavatāṃ surāḥ \| |
| आगच्छत वयं यामस्तीरं क्षीरपयोनिधेः ॥११॥ | āgacchata vayaṃ yāmastīraṃ kṣīrapayonidheḥ \|\|11\|\| |
| इत्युक्तास्ते पुरोधाय ब्रह्माणं त्रिदिवौकसः । | ityuktāste purodhāya brahmāṇaṃ tridivaukasaḥ \| |
| ययुः क्षीरांबुधेस्तीरमृषयश्च तपोधनाः॥१२॥ | yayuḥ kṣīrāṃbudhestīramṛṣayaśca tapodhanāḥ\|\|12\|\| |
| तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् । | tatra gatvā jagannāthaṃ devadevaṃ vṛṣākapim \| |
| गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥१३॥ | gīrbhiścitrapadārthābhistuṣṭuvurjagadīśvaram \|\|13\|\| |
| ब्रह्मोवाच । | brahmovāca \| |
| नमस्ते पुरुषाध्यक्ष सर्वभूतगुहाशय । | namaste puruṣādhyakṣa sarvabhūtaguhāśaya \| |
| वासुदेवाखिलाधार जगद्धेतो जगन्मय ॥१४॥ | vāsudevākhilādhāra jagaddheto jaganmaya \|\|14\|\| |
| त्वमेव सर्वभूतानां हेतुः पतिरुताश्रयः । | tvameva sarvabhūtānāṃ hetuḥ patirutāśrayaḥ \| |
| मायाशक्तिमुपाश्रित्य विचरस्येकसुन्दर ॥१५॥ | māyāśaktimupāśritya vicarasyekasundara \|\|15\|\| |
| एको नानायते योऽसौ नटवज्जायतेऽव्ययः । | eko nānāyate yo:'sau naṭavajjāyate:'vyayaḥ \| |
| व्यापकोऽपि कृपालुत्वाद्भक्तहृत्पद्मषट्पद । | vyāpako:'pi kṛpālutvādbhaktahṛtpadmaṣaṭpada \| |
| ददाति विविधानंदं तं वंदे जगतां पतिम् ॥१६॥ । | dadāti vividhānaṃdaṃ taṃ vaṃde jagatāṃ patim \|\|16\|\| \| |
| देवा ऊचुः । | devā ūcuḥ \| |
| विपद्वनांते हुतभुग्जनानां गृहीतसत्त्वस्त्रिदशावनीशः । | vipadvanāṃte hutabhugjanānāṃ gṛhītasattvastridaśāvanīśaḥ \| |
| चराचरात्मा भगवाननंतः कृपाकटाक्षैरवलोकतां नः ॥१७॥ | carācarātmā bhagavānanaṃtaḥ kṛpākaṭākṣairavalokatāṃ naḥ \|\|17\|\| |
| सकृद्यन्नामपीयूषरसपानपरः पुमान् । | sakṛdyannāmapīyūṣarasapānaparaḥ pumān \| |

निःश्रेयसं तृणमिव मन्यते तं हरिं भजे ॥१८॥
अविद्याप्रतिबिंबत्वाज्जीवभावमुपागतः ।
विज्ञत्वादुपशांतात्मा स पुनातु जगत्त्रयम् ॥१९॥
गंधर्वा ऊचुः ।
पिबंति ये हरेः पदांबुसंगलेशतः पयः
पयो न ते पुनःपुनः पिबंति मातुरंकतः ।
प्रसंगतो यदा भिधासुधां निपीय मानवा मृताऽमृतं
व्रजंत्यधो न जातु यांत्यशंकिताः ॥२०॥
ततः स्तुतो हरिः साक्षात्सिंधोरुत्थाय चाब्रवीत् ।
अलक्षितोऽपरैर्ब्रह्मा परं तद्वेद नापरः ॥२१॥
ब्रह्मा तदुपधार्याथ नत्वा तस्मै दिवौकस ।
बोधयामास सकलं सुराः शृणुत सादरम् ॥२२॥
अंतर्हितोऽसौ भगवान्दृष्ट्वा लोकान्कुमेधसः ।
श्रुत्वेत्थं वचनं तस्य सर्वे देवा दिवं ययुः ॥२३॥
ततोऽहं यतिरूपेण तीर्थान्नारदसंज्ञकात् ।
उद्धृत्य स्थापयिष्यामि हरिं लोकहितेच्छया ॥२४॥
यस्य दर्शनमात्रेण पातकानि महान्त्यपि ।
विलीयंते क्षणादेव सिंहं दृष्ट्वा मृगा इव ॥२५॥
धर्माधर्मान्विजित्याथ बदरीशं विभुं हरिम् ।
दृष्ट्वा मुक्तिमुपायांति विनाऽऽयासं षडानन ॥२६॥
त्यक्तप्रायाणि तीर्थानि हरिणा कलिकालतः ।
बदरीं समनुप्राप्य साक्षादेवावतिष्ठते ॥२७॥
कलिकालमनुप्राप्य मुक्तिर्येषामभीप्सिता ।
द्रष्टव्या बदरी तैस्तु हित्वा तीर्थान्यशेषतः ॥२८॥
विना ज्ञानेन योगेन तीर्थाटनपरिश्रमैः ।
एकेन जन्मना जंतुः कैवल्यं पदमश्नुते ॥२९॥
जन्मांतरसहस्रैस्तु येन चाराधितो हरिः ।
स गच्छेद्बदरीं द्रष्टुं यत्र जंतुर्न शोचति ॥३०॥
बदरीबदरीत्युक्त्वा प्रसंगान्मनुजोत्तमः ।
संसारतिमिराबाधे दीपमुज्वालयत्यसौ ॥३१॥
यथा दीपावलोकेन तमोबाधा न जायते ।
तथैव बदरीं दृष्ट्वा पुंसो मृत्युभयं कुतः ॥३२॥
दर्शनाद्यस्य पापानि रुदंत्यव्याहतानि च ।
मुक्तिमार्गमुपालक्ष्य तं वंदे बदरीपतिम् ॥३३॥
सशैलकानना भूमिर्दशधा दक्षिणीकृता ।
हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥३४॥
अश्वमेधे तु यत्पुण्यं वाजपेयशतेन च ।
हरेः प्रदक्षिणात्तद्वद्बदर्यां तत्पदेपदे ॥३५॥
चतुर्मासे तु यत्पुण्यं ब्रह्मांडदानतस्तथा ।
हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥३६॥
अतिकृच्छ्रैर्महाकृच्छ्रैश्छांदसैः सुकृतं भवेत् ।
हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥३७॥
बदर्यां विष्णुनैवेद्यं सिक्थमात्रं षडानन ।
अशनाच्छोधयेत्पापं तुषाग्निरिव कांचनम् ॥३८॥
यदन्नं भगवानत्ति ऋषिभिर्नारदादिभिः ।
तत्सत्त्वशुद्धये सर्वैर्भोक्तव्यमविचारितम् ॥३९॥
अमरा अपि यन्नूनं व्याजेनेच्छन्ति सर्वतः ।
भोक्तुं बदरिकां विष्णोर्नैवेद्यं यांति तत्पराः ॥४०॥

niḥśreyasaṃ tṛṇamiva manyate taṃ hariṃ bhaje ||18||
avidyāpratibiṃbatvājjīvabhāvamupāgataḥ |
vijñatvādupaśāṃtātmā sa punātu jagattrayam ||19||
gaṃdharvā ūcuḥ |
pibaṃti ye hareḥ padāṃbusaṃgaleśataḥ payaḥ
payo na te punaḥpunaḥ pibaṃti māturaṃkataḥ |
prasaṃgato yadā bhidhāsudhāṃ nipīya mānavā mṛtā:'mṛtaṃ
vrajaṃtyadho na jātu yāṃtyaśaṃkitāḥ ||20||
tataḥ stuto hariḥ sākṣātsiṃdhorutthāya cābravīt |
alakṣito:'parairbrahmā paraṃ tadveda nāparaḥ ||21||
brahmā tadupadhāryātha natvā tasmai divaukasa |
bodhayāmāsa sakalaṃ surāḥ śṛṇuta sādaram ||22||
aṃtarhito:'sau bhagavāndṛṣṭvā lokānkumedhasaḥ |
śrutvetthaṃ vacanaṃ tasya sarve devā divaṃ yayuḥ ||23||
tato:'haṃ yatirūpeṇa tīrthānnāradasaṃjñakāt |
uddhṛtya sthāpayiṣyāmi hariṃ lokahitecchayā ||24||
yasya darśanamātreṇa pātakāni mahāntyapi |
vilīyaṃte kṣaṇādeva siṃhaṃ dṛṣṭvā mṛgā iva ||25||
dharmādharmānvijityātha badarīśaṃ vibhuṃ harim |
dṛṣṭvā muktimupāyāṃti vinā:':'yāsaṃ ṣaḍānana ||26||
tyaktaprāyāṇi tīrthāni hariṇā kalikālataḥ |
badarīṃ samanuprāpya sākṣādevāvatiṣṭhate ||27||
kalikālamanuprāpya muktiryeṣāmabhīpsitā |
draṣṭavyā badarī taistu hitvā tīrthānyaśeṣataḥ ||28||
vinā jñānena yogena tīrthāṭanapariśramaiḥ |
ekena janmanā jaṃtuḥ kaivalyaṃ padamaśnute ||29||
janmāṃtarasahasraistu yena cārādhito hariḥ |
sa gacchedbadarīṃ draṣṭuṃ yatra jaṃturna śocati ||30||
badarībadarītyuktvā prasaṃgānmanujottamaḥ |
saṃsāratimirābādhe dīpamujvālayatyasau ||31||
yathā dīpāvalokena tamobādhā na jāyate |
tathaiva badarīṃ dṛṣṭvā puṃso mṛtyubhayaṃ kutaḥ ||32||
darśanādyasya pāpāni rudaṃtyavyāhatāni ca |
muktimārgamupālakṣya taṃ vaṃde badarīpatim ||33||
saśailakānanā bhūmirdaśadhā dakṣiṇīkṛtā |
hareḥ pradakṣiṇaṃ tadvadbadaryāṃ tatpadepade ||34||
aśvamedhe tu yatpuṇyaṃ vājapeyaśatena ca |
hareḥ pradakṣiṇāttadvadbadaryāṃ tatpadepade ||35||
caturmāse tu yatpuṇyaṃ brahmāṃḍadānatastathā |
hareḥ pradakṣiṇaṃ tadvadbadaryāṃ tatpadepade ||36||
atikṛcchrairmahākṛcchraiśchāṃdasaiḥ sukṛtaṃ bhavet |
hareḥ pradakṣiṇaṃ tadvadbadaryāṃ tatpadepade ||37||
badaryāṃ viṣṇunaivedyaṃ sikthamātraṃ ṣaḍānana |
aśanācchodhayetpāpaṃ tuṣāgniriva kāṃcanam ||38||
yadannaṃ bhagavānatti ṛṣibhirnnāradādibhiḥ |
tatsattvaśuddhaye sarvairbhoktavyamavicāritam ||39||
amarā api yannūnaṃ vyājenecchanti sarvataḥ |
bhoktuṃ badarikāṃ viṣṇornaivedyaṃ yāṃti tatparāḥ ||40||

भोजनानंतरं विष्णोः प्रगच्छन्ति स्वमालयम् ।
प्रह्लादप्रमुखा भक्ताः प्रविशंति हरेः पदम् ॥४१॥
बाल्ययौवनवार्द्धक्ये यत्पापं ज्ञानतः कृतम् ।
नैवेद्यभक्षणाद्विष्णोर्बदर्यां तद्विलीयते ॥४२॥
प्राणांतं यस्य पापस्य प्रायश्चित्तं प्रकीर्तितम् ।
विष्णोर्निवेदितं भुक्त्वा बदर्य्यां तन्निवर्त्तते ॥४६॥
तीर्थांतरेषु यत्नेन मुक्तिं गच्छति मानवः ।
नैवेद्यभक्षणाद्विष्णोः सालोक्यं लभते नरः ॥४४॥
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकं सनिर्माल्यं मस्तके यस्य सोऽच्युतः ॥४५॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ।
नैवेद्यभक्षणाद्विष्णोर्बदर्यां यांति संक्षयम् ॥४६॥
बदरीसदृशं क्षेत्रं नैवेद्यसदृशं वसु ।
नारदीयसमं क्षेत्रं न भूतं न भविष्यति ॥४७॥
बदरी यत्नतो गम्या भोक्तव्यं तन्निवेदितम् ।
द्रष्टव्यो भगवान्वह्नितीर्थे स्नानं सुदुर्लभम् ॥४८॥
पृथिव्यां यानि तीर्थानि व्रतानि नियमास्तथा ।
पादोदकं विशालायां पावनं पुरतो भवेत् ॥४९॥
किं तस्य दानैस्तपसा तीर्थाटनपरिश्रमैः ।
बदर्यां विष्णुपादोदबिंदुमात्रं लभेद्यदि ॥५०॥
प्रायश्चित्तानि जल्पंति तावदेव षडानन ।
यावन्न लभ्यते विष्णोर्बदर्यां चरणोदकम् ॥५१॥
अनायासेन येषां वा इच्छा मुक्तिपथे नृणाम् ।
कर्त्तव्यं तैः प्रयत्नेन विष्णोर्नैवेद्यभक्षणम् ॥५२॥
ये नराः प्रतिगृह्णंति पापाः संसारभागिनः ।
यात्राकृतं फलं तेषां न कदाचित्प्रजायते ॥५३॥
नैवेद्यनिंदनाद्विष्णोर्निंद्यंते ते तमोगताः ।
नैवेद्यभक्षणात्सत्त्वशुद्धिरेव न संशयः ॥५४॥
नैवेद्यं स्वयमानीय ब्राह्मणान्भोजयंति ये ।
तुलापुरुषदानेन किं फलं ते कृतार्थिनः ॥५५॥
कुरुक्षेत्रे समासाद्य राहुग्रस्ते दिवाकरे ।
महादानेन यत्पुण्यं बदर्य्यां ग्रासमात्रतः ॥५६॥
बदरीक्षेत्रमासाद्य ग्रासमात्रं प्रयत्नतः ।
उपायोऽयं महांस्तत्र बदर्यां हरितोषणे ।
यतिभ्यो भोजनाद्विष्णोरपराध्यपि वल्लभः ॥५७॥
न विष्णोः सदृशो देवो न विशाला समा पुरी ।
न भिक्षुसदृशं पात्रमृषितीर्थसमं न हि ॥५८॥
चातुर्मास्यं प्रकुर्वंति ये नराः पुण्यशालिनः।
तेषां पुण्यफलं वक्तुं ब्रह्मणापि न शक्यते ॥५९॥
भिक्षुकाणां फलावाप्तिर्विशेषादिह कीर्त्यते ।
वेदांतश्रवणात्पुण्यं दशधा यत्प्रकीर्तितम् ॥६०॥
बदरी दृष्टिमात्रेण भिक्षुकाणां तदिष्यते ।
चातुर्मास्ये विशेषेण कैवल्यफलभागिनः ॥६१॥
न्यासिनो बदरीस्थाने विनायासेन पुत्रक ।
ये मूर्खा जाड्यमापन्ना दम्भकाषायवाससः ।
बदरीदर्शनात्तेषां मुक्तिः करतले स्थिता ॥६२॥
ज्ञानिनोऽज्ञानिनो वापि न्यासिनो नियतव्रता ।
द्रष्टव्या बदरी तैस्तु फलानि समभीप्सुभिः ॥६३॥

bhojanānaṃtaraṃ viṣṇoḥ pragacchanti svamālayam |
prahlādapramukhā bhaktāḥ praviśaṃti hareḥ padam ||41||
bālyayauvanavārddhakye yatpāpaṃ jñānataḥ kṛtam |
naivedyabhakṣaṇādviṣṇorbadaryāṃ tadvilīyate ||42||
prāṇāṃtaṃ yasya pāpasya prāyaścittaṃ prakīrtitam |
viṣṇornivevitaṃ bhuktvā badaryyāṃ tannivarttate ||46||
tīrthāṃtareṣu yatnena muktiṃ gacchati mānavaḥ |
naivedyabhakṣaṇādviṣṇoḥ sālokyaṃ labhate naraḥ ||44||
hṛdi rūpaṃ mukhe nāma naivedyamudare hareḥ |
pādodakaṃ sanirmālyaṃ mastake yasya so:'cyutaḥ ||45||
brahmahatyā surāpānaṃ steyaṃ gurvaṃganāgamaḥ |
naivedyabhakṣaṇādviṣṇorbadaryāṃ yāṃti saṃkṣayam ||46||
badarīsadṛśaṃ kṣetraṃ naivedyasadṛśaṃ vasu |
nāradīyasamaṃ kṣetraṃ na bhūtaṃ na bhaviṣyati ||47||
badarī yatnato gamyā bhoktavyaṃ tanniveditam |
draṣṭavyo bhagavānvahnitīrthe snānaṃ sudurlabham ||48||
pṛthivyāṃ yāni tīrthāni vratāni niyamāstathā |
pādodakaṃ viśālāyāṃ pāvanaṃ purato bhavet ||49||
kiṃ tasya dānaistapasā tīrthāṭanapariśramaiḥ |
badaryāṃ viṣṇupādodabiṃdumātraṃ labhedyadi ||50||
prāyaścittāni jalpaṃti tāvadeva ṣaḍānana |
yāvanna labhyate viṣṇorbadaryāṃ caraṇodakam ||51||
anāyāsena yeṣāṃ vā icchā muktipathe nṛṇām |
karttavyaṃ taiḥ prayatnena viṣṇornaivedyabhakṣaṇam ||52||
ye narāḥ pratigṛhṇaṃti pāpāḥ saṃsārabhāginaḥ |
yātrākṛtaṃ phalaṃ teṣāṃ na kadācitprajāyate ||53||
naivedyaniṃdanādviṣṇorniṃdyaṃte te tamogatāḥ |
naivedyabhakṣaṇātsattvaśuddhireva na saṃśayaḥ ||54||
naivedyaṃ svayamānīya brāhmaṇānbhojayaṃti ye |
tulāpuruṣadānena kiṃ phalaṃ te kṛtārthinaḥ ||55||
kurukṣetre samāsādya rāhugraste divākare |
mahādānena yatpuṇyaṃ badaryyāṃ grāsamātrataḥ ||56||
badarīkṣetramāsādya grāsamātraṃ prayatnataḥ |
upāyo:'yaṃ mahāṃstatra badaryāṃ haritoṣaṇe |
yatibhyo bhojanādviṣṇoraparādhyapi vallabhaḥ ||57||
na viṣṇoḥ sadṛśo devo na viśālā samā purī |
na bhikṣusadṛśaṃ pātramṛṣitīrthasamaṃ na hi ||58||
cāturmāsyaṃ prakurvaṃti ye narāḥ puṇyaśālinaḥ|
teṣāṃ puṇyaphalaṃ vaktuṃ brahmaṇāpi na śakyate ||59||
bhikṣukāṇāṃ phalāvāptirviśeṣādiha kīrtyate |
vedāṃtaśravaṇātpuṇyaṃ daśadhā yatprakīrtitam ||60||
badarī dṛṣṭimātreṇa bhikṣukāṇāṃ tadiṣyate |
cāturmāsye viśeṣeṇa kaivalyaphalabhāginaḥ ||61||
nyāsino badarīsthāne vināyāsena putraka |
ye mūrkhā jāḍyamāpannā dambhakāṣāyavāsasaḥ |
badarīdarśanātteṣāṃ muktiḥ karatale sthitā ||62||
jñānino:'jñānino vāpi nyāsino niyatavratā |
draṣṭavyā badarī taistu phalāni samabhīpsubhiḥ ||63||

श्रुत्वाऽध्यायमिमं पुण्यं प्रसंगेनापि मानवः ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥६४॥

śrutvā:'dhyāyamimaṃ puṇyaṃ prasaṃgenāpi mānavaḥ |
sarvapāpavinirmukto viṣṇuloke mahīyate ||64||

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे पंचमोऽध्यायः ॥५॥

iti śrīskāṃde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ dvitīye vaiṣṇavakhaṇḍe
badarikāśramamāhātmye śivakārttikeyasaṃvāde paṃcamo:'dhyāyaḥ ||5||

वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥६॥
स्कंद उवाच ।
कराद्विगलितं यत्र कपालं ते महेश्वर ।
तस्य तीर्थस्य माहात्म्यं कृपया वद मे पितः ॥१॥
शिव उवाच ।
अतिगुह्यमिदं तीर्थं सुरासुरनमस्कृतम् ।
ब्रह्महाऽपि नरो यत्र स्नानमात्रेण शुद्ध्यति ॥२॥
पंच तीर्थानि तिष्ठंति कपाले पापमोचने ।
तत्र स्नानं तपो दानं सर्वमक्षयमिष्यते ॥३॥
पिंडं विधाय विधिवन्नरकात्तारयेत्पितॄन् ।
पितृतीर्थमिदं प्रोक्तं गयातोऽष्टगुणाधिकम् ॥४॥
तिलतर्प्पणतो यांति पितरः स्वर्गमुत्तमम् ॥५॥
अहोरात्रं स्थिरो भूत्वा जपनिष्ठः समाहितः ।
तस्येष्टसिद्धिर्महती तत्क्षणादेव जायते ॥६॥
पारलौकिककर्माणि सर्वाण्यव्याहतानि च ।
कपालमोचने तीर्थे नाधिकं पितृकर्मणि ॥७॥
स्कंद उवाच ।
कुत्र वा ब्रह्मतीर्थं वै फलं वा कीदृशं भवेत् ।
के वा तत्र वसंतीह कृपया वद मे पितः ॥८॥
शिव उवाच ।
एकदा विष्णुनाभ्यम्भोरुहस्थस्य प्रजापतेः ।
वेदान्मुखांबुजाद्धृत्वा जग्मतुर्मधुकैटभौ ॥९॥
ततो ह्युत्थाय शयनात्सिसृक्षुरब्जसंभवः ।
स्रष्टुं विनाऽगमं लोके न शशाक हृतस्मृतिः ॥१०॥
तदा बदरिकामेत्य हरिणा प्रतिपालिताम् ।
तुष्टाव प्रणतो भूत्वा भगवंतं सनातनम् ॥११॥
ततः कुंडात्समुद्भूतो हयशीर्षो निजायुधः ।
पीतांबरधरः शुक्लश्चतुर्बाहुः सुदृप्तदृक् ॥१२॥
अत्यद्भुतः
प्रकटकठोरलोचनश्चलच्छटाविच्छुरितमेघडंबरः ।
स्वतेजसा हतनिखिलप्रभाकुलः कृपान्वितो
द्रुहिणपुरःसरोऽभवत् ॥१३॥
निरीक्ष्य तं विधिरपि विस्मयाकुलः
प्रणम्य च स्तुतिमकरोत्प्रसन्नदृक् ॥१४॥
ब्रह्मोवाच ।
नमः कमलनाभाय नमस्ते कमलाश्रय ।
नमस्ते कमलावासविशालवनमालिने ॥१५॥
नमो विज्ञानभात्राय गुहावास निवासिने ।
हृषीकेशाय शांताय तुभ्यं भगवते नमः ॥१६॥
स्वभक्तरक्षणकृते धृतदेहाय शार्ङ्गिणे ।
अनंतक्लेशनाशाय गदिने ब्रह्मणे नमः ॥१७॥
संसारविविधासारनिवृत्तिकृतकर्मणे ।
रक्षित्रे सर्वजंतूनां विष्णवे जिष्णवे नमः ॥१८॥
नमो विश्वंभराशेषनिवृत्तगुणवृत्तये ।
सुरासुरवरस्तंभनिवृत्तिस्थितिकीर्तये ॥१९॥
इतीरितः सुरपतिना महेश्वरो
हृदिस्थितोऽखिलविदशेषकर्मभिः ।
ततोऽन्तरं सपदि गतो निबध्य तौ

vaiṣṇavakhaṇḍaḥ ||3|| badarikāśramamāhātmyam adhyāyaḥ ||6||
skaṃda uvāca |
karādvigalitaṃ yatra kapālaṃ te maheśvara |
tasya tīrthasya māhātmyaṃ kṛpayā vada me pitaḥ ||1||
śiva uvāca |
atiguhyamidaṃ tīrthaṃ surāsuranamaskṛtam |
brahmahā:'pi naro yatra snānamātreṇa śuddhyati ||2||
paṃca tīrthāni tiṣṭhaṃti kapāle pāpamocane |
tatra snānaṃ tapo dānaṃ sarvamakṣayamiṣyate ||3||
piṃḍaṃ vidhāya vidhivannarakāttārayetpitṝn |
pitṛtīrthamidaṃ proktaṃ gayāto:'ṣṭaguṇādhikam ||4||
tilatarppaṇato yāṃti pitaraḥ svargamuttamam ||5||
ahorātraṃ sthiro bhūtvā japaniṣṭhaḥ samāhitaḥ |
tasyeṣṭasiddhirmahatī tatkṣaṇādeva jāyate ||6||
pāralaukikakarmāṇi sarvāṇyavyāhatāni ca |
kapālamocane tīrthe nādhikaṃ pitṛkarmaṇi ||7||
skaṃda uvāca |
kutra vā brahmatīrthaṃ vai phalaṃ vā kīdṛśaṃ bhavet |
ke vā tatra vasaṃtīha kṛpayā vada me pitaḥ ||8||
śiva uvāca |
ekadā viṣṇunābhyambhoruhasthasya prajāpateḥ |
vedānmukhāṃbujāddhṛtvā jagmaturmadhukaiṭabhau ||9||
tato hyutthāya śayanātsisṛkṣurabjasaṃbhavaḥ |
srastuṃ vinā:'gamaṃ loke na śaśāka hṛtasmṛtiḥ ||10||
tadā badarikāmetya hariṇā pratipālitām |
tuṣṭāva praṇato bhūtvā bhagavaṃtaṃ sanātanam ||11||
tataḥ kuṃḍātsamudbhūto hayaśīrṣo nijāyudhaḥ |
pītāṃbaradharaḥ śuklaścaturbāhuḥ sudṛptadṛk ||12||
atyadbhutaḥ
prakaṭakaṭhoralocanaścalacchaṭāvicchuritameghaḍaṃbaraḥ |
svatejasā hatanikhilaprabhākulaḥ kṛpānvito
druhiṇapuraḥsaro:'bhavat ||13||
nirīkṣya taṃ vidhirapi vismayākulaḥ
praṇamya ca stutimakarotprasannadṛk ||14||
brahmovāca |
namaḥ kamalanābhāya namaste kamalāśraya |
namaste kamalāvāsaviśālavanamāline ||15||
namo vijñānabhātrāya guhāvāsa nivāsine |
hṛṣīkeśāya śāṃtāya tubhyaṃ bhagavate namaḥ ||16||
svabhaktarakṣaṇakṛte dhṛtadehāya śārṅgiṇe |
anaṃtakleśanāśāya gadine brahmaṇe namaḥ ||17||
saṃsāravividhāsāranivṛttikṛtakarmaṇe |
rakṣitre sarvajaṃtūnāṃ viṣṇave jiṣṇave namaḥ ||18||
namo viśvaṃbharāśeṣanivṛttaguṇavṛttaye |
surāsuravarastaṃbhanivṛttisthitikīrtaye ||19||
itīritaḥ surapatinā maheśvaro
hṛdisthito:'khilavidaśeṣakarmabhiḥ |
tato:'ntaraṃ sapadi gato nibadhya tau

| | |
|---|---|
| सुरद्रुहौ किल निजघान लीलया ॥२०॥ | suradruhau kila nijaghāna līlayā \|\|20\|\| |
| ततो निगममादाय ब्रह्मणोंऽतिकमाययौ। | tato nigamamādāya brahmaṇoṃ:'tikamāyayau\| |
| दत्त्वा स्वनिगमं तस्मै स्वस्थोऽभूत्स समीडितः ॥२१॥ | dattvā svanigamaṃ tasmai svastho:'bhūtsa samīḍitaḥ \|\|21\|\| |
| ततः प्रभृति तत्तीर्थं ब्रह्मणा प्रकटीकृतम् । | tataḥ prabhṛti tattīrthaṃ brahmaṇā prakaṭīkṛtam \| |
| ब्रह्मकुंडमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥२२॥ | brahmakuṃḍamiti khyātaṃ triṣu lokeṣu viśrutam \|\|22\|\| |
| यस्य दर्शनमात्रेण महापातकिनो जनाः । | yasya darśanamātreṇa mahāpātakino janāḥ \| |
| विमुक्तकिल्बिषाः सद्यो ब्रह्मलोकं व्रजंति ते ॥२३॥ | vimuktakilbiṣāḥ sadyo brahmalokaṃ vrajaṃti te \|\|23\|\| |
| स्नानं कुर्वंति ये लोका व्रतचर्यामथापि वा । | snānaṃ kurvaṃti ye lokā vratacaryāmathāpi vā \| |
| ब्रह्मलोकमतिक्रम्य विष्णुलोकं व्रजंति ते ॥२४॥ | brahmalokamatikramya viṣṇulokaṃ vrajaṃti te \|\|24\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| ततः किमकरोद्धाता लब्ध्वा वेदाञ्जनार्द्दनात् । | tataḥ kimakaroddhātā labdhvā vedāñjanārddanāt \| |
| एतदन्यच्च सर्वं मे कृपया वद सांप्रतम् ॥२५॥ | etadanyacca sarvaṃ me kṛpayā vada sāṃpratam \|\|25\|\| |
| महादेव उवाच । | mahādeva uvāca \| |
| चतुर्णामपि वेदानां दृष्ट्वा बदरिकाश्रमम् । | caturṇāmapi vedānāṃ dṛṣṭvā badarikāśramam \| |
| मतिर्न जायते गंतुं ब्रह्मणा सह पुत्रक ॥२६॥ | matirna jāyate gaṃtuṃ brahmaṇā saha putraka \|\|26\|\| |
| ततस्तु विकलं दृष्ट्वा ब्रह्माणं जनवासिनः । | tatastu vikalaṃ dṛṣṭvā brahmāṇaṃ janavāsinaḥ \| |
| सिद्धास्तु विधिवत्स्तुत्वा प्रणिपत्येदमब्रुवन् ॥२७॥ | siddhāstu vidhivatstutvā praṇipatyedamabruvan \|\|27\|\| |
| सिद्धा ऊचुः । | siddhā ūcuḥ \| |
| आज्ञा भगवतः कार्या सर्वैः स्थावरजंगमैः । | ājñā bhagavataḥ kāryā sarvaiḥ sthāvarajaṃgamaiḥ \| |
| भगवान्सर्वजंतूनां कर्त्ता हर्ता पिता गुरुः ॥२८॥ | bhagavānsarvajaṃtūnāṃ karttā hartā pitā guruḥ \|\|28\|\| |
| स्थितिर्ब्रह्मांतिके वश्च हरिणैवानुकल्पिता । | sthitirbrahmāṃtike vaśca hariṇaivānukalpitā \| |
| निवृत्तिर्वर्तते चैषा तथाप्येतन्निरामयम् ॥२९॥ | nivṛttirvartate caiṣā tathāpyetannirāmayam \|\|29\|\| |
| एकांते द्रवरूपेण मूर्तिर्वोऽत्रावतिष्ठताम् । | ekāṃte dravarūpeṇa mūrtirvo:'trāvatiṣṭhatām \| |
| द्वितीया ब्रह्मणा सार्द्धं ब्रह्मलोकं व्रजेत्पुनः ॥३०॥ | dvitīyā brahmaṇā sārddhaṃ brahmalokaṃ vrajetpunaḥ \|\|30\|\| |
| ततः सहृदया वेदा द्वैधीकृतात्मरूपकाः । | tataḥ sahṛdayā vedā dvaidhīkṛtātmarūpakāḥ \| |
| ब्रह्मणा ब्रह्मलोकं ते ययुः सार्द्धं प्रहर्षिताः ॥३१॥ | brahmaṇā brahmalokaṃ te yayuḥ sārddhaṃ praharṣitāḥ \|\|31\|\| |
| ततस्त्रिलोकं विधिवत्ससर्ज चतुराननः । | tatastrilokaṃ vidhivatsasarja caturānanaḥ \| |
| द्रवरूपेषु वेदेषु स्नानदानतपःक्रियाः । | dravarūpeṣu vedeṣu snānadānatapaḥkriyāḥ \| |
| कृता विच्छेदिता न स्युर्यावदाभूतसंप्लवम् ॥३२॥ | kṛtā vicchеditā na syuryāvadābhūtasaṃplavam \|\|32\|\| |
| फलमुद्दिश्य कुर्वंति उपवासत्रयं नराः । | phalamuddiśya kurvaṃti upavāsatrayaṃ narāḥ \| |
| चतुर्णामपि वेदानां व्याख्यातारो न संशयः ॥३३॥ | caturṇāmapi vedānāṃ vyākhyātāro na saṃśayaḥ \|\|33\|\| |
| अनुक्रमेण तिष्ठंति वेदाश्चत्वार एव च । | anukrameṇa tiṣṭhaṃti vedāścatvāra eva ca \| |
| ऋग्यजुःसामाथर्वाख्या भगवत्पार्श्ववर्तिनः ॥३४॥ | ṛgyajuḥsāmātharvākhyā bhagavatpārśvavartinaḥ \|\|34\|\| |
| ये पुण्यवंतोऽकलुषा वेदवेदांगपारगाः । | ye puṇyavaṃto:'kaluṣā vedavedāṃgapāragāḥ \| |
| ते वेदघोषं विरलाः शृण्वंत्यपि कलौ युगे ॥३५॥ | te vedaghoṣaṃ viralāḥ śṛṇvaṃtyapi kalau yuge \|\|35\|\| |
| चतुर्णामपि वेदानामुदगस्ति सरस्वती । | caturṇāmapi vedānāmudagasti sarasvatī \| |
| जप्ताथ सा नृणां हंति जडतां जलरूपिणी ॥३६॥ | japtātha sā nṛṇāṃ haṃti jaḍatāṃ jalarūpiṇī \|\|36\|\| |
| सरस्वत्या जले स्थित्वा जपं कृत्वा समाहितः । | sarasvatyā jale sthitvā japaṃ kṛtvā samāhitaḥ \| |
| मनोस्तस्य न विच्छेदः कदाचिदपि जायते ॥३७॥ | manostasya na vicchedaḥ kadācidapi jāyate \|\|37\|\| |
| वेदव्यासोऽपि भगवान्यत्प्रसादादुदारधीः । | vedavyāso:'pi bhagavānyatprasādādudāradhīḥ \| |
| पुराणसंहितार्थज्ञोऽभवदत्र न संशयः ॥३८॥ | purāṇasaṃhitārthajño:'bhavadatra na saṃśayaḥ \|\|38\|\| |
| त्रयाणामपि लोकानां हिताय जगतां पतिः । | trayāṇāmapi lokānāṃ hitāya jagatāṃ patiḥ \| |
| स्थापयामास विधिना वाणीं वाग्विभवप्रदाम् ॥३९॥ | sthāpayāmāsa vidhinā vāṇīṃ vāgvibhavapradām \|\|39\|\| |
| दर्शनस्पर्शनस्नानपूजास्तुत्यभिवन्दनैः । | darśanasparśanasnānapūjāstutyabhivandanaiḥ \| |
| सरस्वत्या न विच्छेदः कुले तस्य कदाचन ॥४०॥ | sarasvatyā na vicchedaḥ kule tasya kadācana \|\|40\|\| |
| मन्त्रसिद्धिर्विशेषेण सरस्वत्यास्तटे नृणाम् । | mantrasiddhirviśeṣeṇa sarasvatyāstaṭe nṛṇām \| |
| जपतामचिरणैव जायते नात्र संशयः ॥४१॥ | japatāmaciraṇaiva jāyate nātra saṃśayaḥ \|\|41\|\| |
| बहुना किमिहोक्तेन वाणी वाग्विभवप्रदा । | bahunā kimihoktena vāṇī vāgvibhavapradā \| |

| | |
|---|---|
| द्रवरूपधरा नृणां दर्शनात्पूतिरुज्ज्वला ॥४२॥ | dravarūpadharā nṛṇāṃ darśanātpūtirujjvalā \|\|42\|\| |
| ततोऽर्वाग्दक्षिणे भागे द्रवधारेति विश्रुतम् । | tato:'rvāgdakṣiṇe bhāge dravadhāreti viśrutam \| |
| तीर्थमिंद्रपदं यत्र तपश्चक्रे पुरंदरः ॥४३॥ | tīrthamiṃdrapadaṃ yatra tapaścakre puraṃdaraḥ \|\|43\|\| |
| सुदारुणं तपः कृत्वा परितोष्य जनार्द्दनम् । | sudāruṇaṃ tapaḥ kṛtvā paritoṣya janārddanam \| |
| पदमैंद्रं समालेभे सुरासुरनमस्कृतम् ॥४४॥ | padamaiṃdraṃ samālebhe surāsuranamaskṛtam \|\|44\|\| |
| तपो दानं जपो होमो व्रतानि नियमा यमाः । | tapo dānaṃ japo homo vratāni niyamā yamāḥ \| |
| तत्रानन्तगुणं प्रोक्तं तत्तीर्थमतिदुर्लभम् ॥४५॥ | tatrānantaguṇaṃ proktaṃ tattīrthamatidurlabham \|\|45\|\| |
| प्रतिमासे त्रयोदश्यां शुक्लायां हरितोषणे । | pratimāse trayodaśyāṃ śuklāyāṃ haritoṣaṇe \| |
| स्नात्वा सुतीर्थे सुत्रामाच्छन्दं चोपेत्य संगतः ॥४६॥ | snātvā sutīrthe sutrāmācchandaṃ copetya saṃgataḥ \|\|46\|\| |
| उपवासद्वयं कृत्वा पूजयित्वा जनार्द्दनम् । | upavāsadvayaṃ kṛtvā pūjayitvā janārddanam \| |
| सर्वपापविनिर्मुक्तः शक्रलोके महीयते ॥४७॥ | sarvapāpavinirmuktaḥ śakraloke mahīyate \|\|47\|\| |
| तत्रैव मानसोद्भेदः सर्वपापप्रणाशनः । | tatraiva mānasodbhedaḥ sarvapāpapraṇāśanaḥ \| |
| दुर्लभः सर्वजंतूनां यत्र ते स्युर्महर्षयः ॥४८॥ | durlabhaḥ sarvajaṃtūnāṃ yatra te syurmaharṣayaḥ \|\|48\|\| |
| मानसं चिदचिद्ग्रन्थिमुद्ग्रथ्नंति च सर्वतः । | mānasaṃ cidacidgranthimudgrathnaṃti ca sarvataḥ \| |
| मानसोद्भेव इत्याख्या ऋषिभिः परिगीयते ॥४९॥ | mānasodbheva ityākhyā ṛṣibhiḥ parigīyate \|\|49\|\| |
| भिंदंति हृदयग्रंथींश्छिंदन्ति बहुसंशयम् । | bhiṃdaṃti hṛdayagraṃthīṃśchiṃdanti bahusaṃśayam \| |
| कर्माणि क्षपयन्त्यस्मान्मानसोद्भेद इत्यभूत् ॥५०॥ | karmāṇi kṣapayantyasmānmānasodbheda ityabhūt \|\|50\|\| |
| यदि भाग्यवशादत्र बिंदुमात्रं लभेन्नरः । | yadi bhāgyavaśādatra biṃdumātraṃ labhennaraḥ \| |
| तत्क्षणान्मुक्तिमाप्नोति किमतस्त्वधिकं भवेत् ॥५१॥ | tatkṣaṇānmuktimāpnoti kimatastvadhikaṃ bhavet \|\|51\|\| |
| गिरिदरीनिलये निवसत्यमी | giridarīnilaye nivasatyamī |
| ऋषिगणाः फलमूलजलाशनाः । | ṛṣigaṇāḥ phalamūlajalāśanāḥ \| |
| जितमनोविषयाः शितबुद्धयः | jitamanoviṣayāḥ śitabuddhayaḥ |
| कलिभयादिव पापभयाकुलाः ॥५२॥ | kalibhayādiva pāpabhayākulāḥ \|\|52\|\| |
| फलसमीरणगह्वरनिर्झराश्रमभरादुपलब्धपटोत्तमाः । | phalasamīraṇagahvaranirjharāśramabharādupalabdhapaṭottamāḥ \| |
| त्रिषवणक्रमनिर्जितदुर्जयेन्द्रियपराक्रमणा | triṣavaṇakramanirjitadurjayendriyaparākramaṇā |
| मुनयस्त्वमी ॥५३॥ | munayastvamī \|\|53\|\| |
| साधनानि बहून्येव कायक्लेशकराण्यहो । | sādhanāni bahūnyeva kāyakleśakarāṇyaho \| |
| सुलभं साधनं लोके मानसोद्भेददर्शनम् ॥५४॥ | sulabhaṃ sādhanaṃ loke mānasodbhedadarśanam \|\|54\|\| |
| यस्मिन्दिने जलं चैतल्लभते पुण्यवाञ्जनः । | yasmindine jalaṃ caitallabhate puṇyavāñjanaḥ \| |
| भवति व्याससदृशो यमपितृसमः क्रमात् ॥५५॥ | bhavati vyāsasadṛśo yamapitṛsamaḥ kramāt \|\|55\|\| |
| काम्यतीर्थमिदं नृणां कामनावशकृत्पुनः । | kāmyatīrthamidaṃ nṝṇāṃ kāmanāvaśakṛtpunaḥ \| |
| अकामतस्तु मुक्तिः स्यादुभयोरेष निश्चयः ॥५६॥ | akāmatastu muktiḥ syādubhayoreṣa niścayaḥ \|\|56\|\| |
| यदि कश्चित्प्रमादेन कामनां कुरुते नरः । | yadi kaścitpramādena kāmanāṃ kurute naraḥ \| |
| फलं भुक्त्वा पुनर्मुक्तिर्भवत्येव न संशयः ॥५७॥ | phalaṃ bhuktvā punarmuktirbhavatyeva na saṃśayaḥ \|\|57\|\| |
| महरादिषु लोकेषु भुक्त्वा भोगान्यथेप्सितान् । | maharādiṣu lokeṣu bhuktvā bhogānyathepsitān \| |
| भोगे भुक्ते पुनर्याति कामनावशतो जनः ॥५८॥ | bhoge bhukte punaryāti kāmanāvaśato janaḥ \|\|58\|\| |
| पुरुषार्थसमावाप्त्यै यतनीयं मनीषिभिः । | puruṣārthasamāvāptyai yatanīyaṃ manīṣibhiḥ \| |
| मानसोद्भेदने तीर्थे नापेत्यत्रेति मे मतिः ॥५९॥ | mānasodbhedane tīrthe nāpetyatreti me matiḥ \|\|59\|\| |
| मानसोद्भेदनात्प्रत्यग्दिशि सर्वमनोहरम् । | mānasodbhedanātpratyagdiśi sarvamanoharam \| |
| वसुधारेति विख्यातं तीर्थं त्रैलोक्यदुर्लभम् ॥६०॥ | vasudhāreti vikhyātaṃ tīrthaṃ trailokyadurlabham \|\|60\|\| |
| त्रिलोक्यां सर्वतीर्थेभ्यः श्रेष्ठो बदरिकाश्रमः । | trilokyāṃ sarvatīrthebhyaḥ śreṣṭho badarikāśramaḥ \| |
| श्रुत्वा तन्नारदात्सर्वे वसवः समुपागताः ॥६१॥ | śrutvā tannāradātsarve vasavaḥ samupāgatāḥ \|\|61\|\| |
| त्रिंशद्वर्षसहस्राणि तपः परमदारुणम् । | triṃśadvarṣasahasrāṇi tapaḥ paramadāruṇam \| |
| दलांबुप्राशनाश्चक्रुस्ततः सिद्धिमुपाययुः ॥६२॥ | dalāmbuprāśanāścakrustataḥ siddhimupāyayuḥ \|\|62\|\| |
| भगवद्दर्शनात्प्राप्तानंदनिर्वृत्तविक्लमाः । | bhagavaddarśanātprāptānaṃdanirvṛttaviklamāḥ \| |
| हृदयानन्दसंदोहप्रफुल्लितमुखांबुजाः ॥६३॥ | hṛdayānandasaṃdohapraphullitamukhāṃbujāḥ \|\|63\|\| |
| दृष्ट्वा नारायणं देवं वरं लब्ध्वा मनोरमम् । | dṛṣṭvā nārāyaṇaṃ devaṃ varaṃ labdhvā manoramam \| |
| हरिभक्तिसुखैश्वर्य्यं परं लब्ध्वा मुदं ययुः ॥६४॥ | haribhaktisukhaiśvaryyaṃ paraṃ labdhvā mudaṃ yayuḥ \|\|64\|\| |

| | |
|---|---|
| अत्र स्नात्वा जलं पीत्वा पूजयित्वा जनार्द्दनम्। | atra snātvā jalaṃ pītvā pūjayitvā janārddanam\| |
| इह लोके सुखं भुक्त्वा यात्यंते परमं पदम् ॥६५॥ | iha loke sukhaṃ bhuktvā yātyaṃte paramaṃ padam \|\|65\|\| |
| अत्र पुण्यवतां ज्योतिर्दृश्यते जलमध्यतः। | atra puṇyavatāṃ jyotirdṛśyate jalamadhyataḥ\| |
| यद्दृष्ट्वा न पुनर्भूयो गर्भवासं प्रपद्यते ॥६६॥ | yaddṛṣṭvā na punarbhūyo garbhavāsaṃ prapadyate \|\|66\|\| |
| येऽशुद्धपितृजाः पापाः पाषंडमतिवृत्तयः । | ye:'śuddhapitṛjāḥ pāpāḥ pāṣaṃḍamativṛttayaḥ \| |
| न तेषां शिरसि प्रायः पतंत्यापः कदाचन ॥६७॥ | na teṣāṃ śirasi prāyaḥ pataṃtyāpaḥ kadācana \|\|67\|\| |
| दिनत्रयं शुचिर्भूत्वा पूजयित्वा जनार्दनम् । | dinatrayaṃ śucirbhūtvā pūjayitvā janārdanam \| |
| उपोष्य भगवद्भक्त्या सिद्धान्पश्यंति साधवः ॥६८॥ | upoṣya bhagavadbhaktyā siddhānpaśyaṃti sādhavaḥ \|\|68\|\| |
| ये तत्र चपलास्तथ्यं न वदंति च लोलुपाः । | ye tatra capalāstathyaṃ na vadaṃti ca lolupāḥ \| |
| परिहासपरद्रव्यपरस्त्रीकपटाग्रहाः ॥६९॥ | parihāsaparadravyaparastrīkapaṭāgrahāḥ \|\|69\|\| |
| मलचैलावृताऽशांताऽशुचयस्त्यक्तसत्क्रियाः । | malacailāvṛtā:'śāṃtā:'śucayastyaktasatkriyāḥ \| |
| तेषां मलिनचित्तानां फलमत्र न जायते ॥७०॥ | teṣāṃ malinacittānāṃ phalamatra na jāyate \|\|70\|\| |
| ये तत्र साधकाः शांता विरला विधिवर्त्मगाः । | ye tatra sādhakāḥ śāṃtā viralā vidhivartmagāḥ \| |
| तेषां जपस्तपोहोमो दानव्रतजपक्रियाः ॥७१॥ | teṣāṃ japastapohomo dānavratajapakriyāḥ \|\|71\|\| |
| क्रियमाणा यथाशक्त्या ह्यक्षय्यफलदायकाः ॥७२॥ | kriyamāṇā yathāśaktyā hyakṣayyaphaladāyakāḥ \|\|72\|\| |
| यत्किंचिच्छुभकर्माणि क्रियमाणानि देहिनाम् । | yatkiṃcicchubhakarmāṇi kriyamāṇāni dehinām \| |
| महदादिफलं दद्युर्निःश्रेयसमनुत्तमम् ॥७३॥ | mahadādiphalaṃ dadyurniḥśreyasamanuttamam \|\|73\|\| |
| श्रावणीयमिह किं फलाधिकं | śrāvaṇīyamiha kiṃ phalādhikaṃ |
| यत्र यांति विबुधाः फलार्थिनः । | yatra yāṃti vibudhāḥ phalārthinaḥ \| |
| पूजितादनु हरेः प्रियार्थिनः | pūjitādanu hareḥ priyārthinaḥ |
| स्वर्गमार्गनिरताः प्रमोदिनः ॥७४॥ | svargamārganiratāḥ pramodinaḥ \|\|74\|\| |
| यत्र संति न च विघ्नकारिणः | yatra saṃti na ca vighnakāriṇaḥ |
| कर्मणां हरिभयात्सुसिध्यति । | karmaṇāṃ haribhayātsusidhyati \| |
| निर्विशंति च फलं विवेकिनः | nirviśaṃti ca phalaṃ vivekinaḥ |
| कर्ममार्गनिरताः सुदेहिनः ॥७५॥ | karmamārganiratāḥ sudehinaḥ \|\|75\|\| |
| ये पठंत्यथ च पाठयंत्यहो पुण्यतीर्थविषयं प्रकाशितम् । | ye paṭhaṃtyatha ca pāṭhayaṃtyaho puṇyatīrthaviṣayaṃ prakāśitam \| |
| भक्तिभावसमलंकृताश्च ते संप्रयान्ति | bhaktibhāvasamalaṃkṛtāśca te saṃprayānti |
| हरिमंदिरं शुभम् ॥७६॥ | harimaṃdiraṃ śubham \|\|76\|\| |

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये
वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे
वसुधारातीर्थमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥६॥

iti śrīskānde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ dvitīye
vaiṣṇavakhaṇḍe badarikāśramamāhātmye śivakārttikeyasaṃvāde
vasudhārātīrthamāhātmyavarṇanaṃnāma ṣaṣṭho:'dhyāyaḥ \|\|6\|\|

| | |
|---|---|
| वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥७॥ | vaiṣṇavakhaṇḍaḥ \|\|3\|\| badarikāśramamāhātmyam adhyāyaḥ \|\|7\|\| |
| शिव उवाच । | śiva uvāca \| |
| ततो नैर्ऋत्यदिग्भागे पंचधाराः पतंत्यधः । | tato nairṛtyadigbhāge paṃcadhārāḥ pataṃtyadhaḥ \| |
| प्रभासं पुष्करं चैव गयां नैमिषमेव च । | prabhāsaṃ puṣkaraṃ caiva gayāṃ naimiṣameva ca \| |
| कुरुक्षेत्रं विजानीहि द्रवरूपं षडानन ॥१॥ | kurukṣetraṃ vijānīhi dravarūpaṃ ṣaḍānana \|\|1\|\| |
| पुरा ते ब्रह्मणः स्थानं गता मलिनरूपिणः । | purā te brahmaṇaḥ sthānaṃ gatā malinarūpiṇaḥ \| |
| पापिनां पापदोषेण विकृताः कृतबुद्धयः ॥२॥ | pāpināṃ pāpadoṣeṇa vikṛtāḥ kṛtabuddhayaḥ \|\|2\|\| |
| तत्र गत्वा नमस्कृत्य ब्रह्माणं लोकभावनम् । | tatra gatvā namaskṛtya brahmāṇaṃ lokabhāvanam \| |
| ऊचुः प्रांजलयः सर्वे निजागमनकारणम् ॥३॥ | ūcuḥ prāṃjalayaḥ sarve nijāgamanakāraṇam \|\|3\|\| |
| तच्छ्रुत्वा ध्यानमालंब्य प्रहस्य जगदीश्वरः । | tacchrutvā dhyānamālaṃbya prahasya jagadīśvaraḥ \| |
| उवाच वचनं चारु स्मृत्वा बदरीकाश्रमम् ॥४॥ | uvāca vacanaṃ cāru smṛtvā badarīkāśramam \|\|4\|\| |
| मा भैष्ट गच्छत क्षिप्रं हरेर्बदरिकाश्रमम् । | mā bhaiṣṭa gacchata kṣipraṃ harerbadarikāśramam \| |
| यस्य निर्देशमात्रेण सद्यः पुण्यं भविष्यति ॥५॥ | yasya nirdeśamātreṇa sadyaḥ puṇyaṃ bhaviṣyati \|\|5\|\| |
| ततस्ते हर्षवेगेन नमस्कृत्य पितामहम् । | tataste harṣavegena namaskṛtya pitāmaham \| |
| जग्मुरुत्फुल्लनयना विशालाममितप्रभाम् ॥६॥ | jagmurutphullanayanā viśālāmamitaprabhām \|\|6\|\| |
| यस्य निर्वेशमात्रेण तत्क्षणाद्विगतेनसः । | yasya nirveśamātreṇa tatkṣaṇādvigatenasaḥ \| |
| ततो द्विरूपमास्थाय स्वस्थानं ययुरुत्सुकाः ॥७॥ | tato dvirūpamāsthāya svasthānaṃ yayurutsukāḥ \|\|7\|\| |
| द्रवरूपेण चान्येन पंच तिष्ठंति निर्मलाः । | dravarūpeṇa cānyena paṃca tiṣṭhaṃti nirmalāḥ \| |
| तेषु स्नात्वा विधानेन कृत्वा नित्यक्रियां शुचिः ॥८॥ | teṣu snātvā vidhānena kṛtvā nityakriyāṃ śuciḥ \|\|8\|\| |
| तत्तत्तीर्थफलं लब्ध्वा यात्यंते परमं पदम् । | tattattīrthaphalaṃ labdhvā yātyaṃte paramaṃ padam \| |
| पंचोपवास निरतः पूजयित्वा जनार्दनम् ॥९॥ | paṃcopavāsa nirataḥ pūjayitvā janārdanam \|\|9\|\| |
| इह भोगान्बहून्भुक्त्वा हरेः सालोक्यमाप्नुयात् ॥१०॥ | iha bhogānbahūnbhuktvā hareḥ sālokyamāpnuyāt \|\|10\|\| |
| ततस्तु विमलं तीर्थं सोमकुंडाभिधं परम् । | tatastu vimalaṃ tīrthaṃ somakuṃḍābhidhaṃ param \| |
| तपश्चकार भगवान्सोमो यत्र कलानिधिः ॥११॥ | tapaścakāra bhagavānsomo yatra kalānidhiḥ \|\|11\|\| |
| स्कन्द उवाच । | skanda uvāca \| |
| सोमकुण्डस्य माहात्म्यं वद मे वदतां वर । | somakuṇḍasya māhātmyaṃ vada me vadatāṃ vara \| |
| त्वत्प्रसादादहं श्रोतुमिच्छामि परमेश्वर ॥१२॥ | tvatprasādādahaṃ śrotumicchāmi parameśvara \|\|12\|\| |
| शिव उवाच । | śiva uvāca \| |
| पुरात्रितनयः श्रीमान्सोमः संप्राप्य यौवनम्। | purātritanayaḥ śrīmānsomaḥ saṃprāpya yauvanam\| |
| श्रुत्वा स्वर्वासिनां सौख्यं गंधर्वेभ्यो मुहुर्मुहुः । | śrutvā svarvāsināṃ saukhyaṃ gaṃdharvebhyo muhurmuhuḥ \| |
| तदा स्वपितरं प्रायात्प्रष्टुं तल्लभते कथम् ॥१३॥ | tadā svapitaraṃ prāyātpraṣṭuṃ tallabhate katham \|\|13\|\| |
| सोम उवाच । | soma uvāca \| |
| भगवन्सर्वधर्मज्ञ करुणामृतसागर । | bhagavansarvadharmajña karuṇāmṛtasāgara \| |
| कथं वा लभ्यते स्वर्गः सर्वेषामुत्तमोत्तमः ॥१४॥ | kathaṃ vā labhyate svargaḥ sarveṣāmuttamottamaḥ \|\|14\|\| |
| ग्रहनक्षत्रताराणामोषधीनां पतिः प्रभो । | grahanakṣatratārāṇāmoṣadhīnāṃ patiḥ prabho \| |
| स्यामहं येन तं यत्नं कृपया वद मे पितः ॥१५॥ | syāmahaṃ yena taṃ yatnaṃ kṛpayā vada me pitaḥ \|\|15\|\| |
| अत्रिरुवाच । | atriruvāca \| |
| तपसाराध्य गोविंदं यमैर्वा नियमैः सुत । | tapasārādhya goviṃdaṃ yamairvā niyamaiḥ suta \| |
| किं दुर्लभं तु साधूनामिह लोके परत्र च ॥१६॥ | kiṃ durllabhaṃ tu sādhūnāmiha loke paratra ca \|\|16\|\| |
| ततस्तु नारदाच्छ्रुत्वा क्षेत्रं परमनिर्मलम् । | tatastu nāradācchrutvā kṣetraṃ paramanirmalam \| |
| जगाम बदरीं नत्वा पितरं दिशमुत्तराम् ॥१७॥ | jagāma badarīṃ natvā pitaraṃ diśamuttarām \|\|17\|\| |
| तत्र गत्वा फलैर्मेध्यैर्विष्णोः पूजामकल्पयत् । | tatra gatvā phalairmedhyairviṣṇoḥ pūjāmakalpayat \| |
| जजाप परमं जाप्यमष्टाक्षरं मनोहरम् ॥१८॥ | jajāpa paramaṃ jāpyamaṣṭākṣaraṃ manoharam \|\|18\|\| |
| अष्टाशीतिसहस्राणि वर्षाणि भगवत्परम् । | aṣṭāśītisahasrāṇi varṣāṇi bhagavatparam \| |
| तपस्तेपेऽतिपरमं सर्वलोकभयावहम् ॥१९॥ | tapastepe:'tiparamaṃ sarvalokabhayāvaham \|\|19\|\| |
| ततस्तुष्टः समागत्य भगवान्भक्तवत्सलः । | tatastuṣṭaḥ samāgatya bhagavānbhaktavatsalaḥ \| |
| उवाच सोमं विधिवद्वरं वरय सुव्रत ॥२०॥ | uvāca somaṃ vidhivadvaraṃ varaya suvrata \|\|20\|\| |
| ततः सोमः समुत्थाय नमस्कृत्य पुनःपुनः । | tataḥ somaḥ samutthāya namaskṛtya punaḥpunaḥ \| |

ग्रहनक्षत्रताराणामोषधीनामहं पतिः ।
द्विजानामपि सर्वेषां भूयासं ते प्रसादतः ॥२१॥
हरिरुवाच ।
वरमन्यं वृणुष्वातो दुर्लभं त्वं भवादृशाम् ।
वरान्नो वरयामास तदा तं हिमजात्मज ॥२२॥
ततोऽतिविमनाः सोमः पुनस्तेपे तपो महत् ।
त्रिंशद्वर्षसहस्राणि देवमानेन पुत्रक ॥२३॥
तदासौ करुणापूर्णहृदयो भगवानगात् ।
वरं वरय भद्रं ते वरदोऽहं तवाग्रतः ।
सोमस्तु तादृशं वव्रे तच्छ्रुत्वान्तर्द्दधे हरिः॥२४॥
ततोऽतिविमनाः सोमः पुनस्तेपे तपो महत्।
चत्वारिंशत्सहस्राणि तपस्तप्तं सुदुष्करम् ॥२५॥
ततस्तुष्टो हरिः साक्षाच्छंखचक्रगदाधरः ।
उवाच वचनं चारु सोमं श्रांतं तपोनिधिम् ॥२६॥
उत्तिष्ठोत्तिष्ठ भद्रं ते वरं वरय सुव्रत ।
तपसाराधितो नूनं त्वयाहं तपसां निधिः ॥२७॥
सोम उवाच ।
यदि तुष्टो भवान्मह्यं भगवान्वरदर्षभः ।
ग्रहनक्षत्रताराणामाधिपत्यं प्रयच्छ मे ।
तथौषधीनां विप्राणां यामिन्याश्च जगत्पते ॥२८॥
श्रीभगवानुवाच ।
दुर्लभं प्रार्थितं वत्स वितरामि तथाप्यहम् ।
एवमस्तु ततः सर्वे समागत्य दिवौ कसः ।
अभिषिक्तवंतो विधिवत्सोमं राजानमादृताः ॥२९॥
ततो विमानमारूढो रथेन शुभ्रवाससा ।
अभिष्टुतः सुरैरभूद्दिवं गतो निशाकरः ॥३०॥
ततः प्रभृति तीर्थं तत्सोमकुंडेति दुर्लभम् ।
यद्दृष्टिमात्रान्मनुजा गतदोषा भवंति हि ॥३१॥
यदुपस्पर्शनाद्यांति सोमलोकं विनिंदिताः ।
यत्र स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥३२॥
सोमलोकं विनिर्भिद्य विष्णुलोकं प्रपद्यते ।
उपवासत्रयं कृत्वा पूजयित्वा जनार्द्दनम् ॥३३॥
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ।
त्रिरात्रेण स्थितो भूत्वा पूजयित्वा जनार्द्दनम् ।
जपं कुर्वन्विशेषेण मंत्रसिद्धिः प्रजायते ॥३४॥
कर्मणा मनसा वाचा यत्कृतं पातकं नृभिः ।
तत्सर्वं क्षयमायाति सोमकुंडेक्षणादिह ॥३५॥
ततस्तु द्वादशादित्यतीर्थं पापहरं परम् ।
यत्र तप्त्वा पुनः कृच्छ्रं काश्यपः सूर्यतां ययौ ॥३६॥
दुर्लभं त्रिषु लोकेषु तपःसिद्ध्येककारणम् ।
रविवारेषु सप्तम्यां संक्रात्यां विधिवन्नरः ।
सप्तजन्मकृतात्पापात्स्नानमात्रेण शुद्ध्यति ॥३७॥
पाराकं विधिवत्कृत्वा पूजनीयो जनार्द्दनः ।
सूर्यलोके सुखं भुक्त्वा विष्णुलोके महीयते ॥३८॥
महारोगाभिभूतस्तु स्नात्वा पीत्वा जलं शुचिः ।
रोगमुक्तोऽचिरादेव नात्र कार्या विचारणा ॥३९॥
चतुःस्रोतं परं तीर्थं विलोचनमनोहरम् ।
धर्मार्थकाममोक्षास्ते तिष्ठंति द्रवरूपिणः ॥४०॥

grahanakṣatratārāṇāmoṣadhīnāmahaṃ patiḥ |
dvijānāmapi sarveṣāṃ bhūyāsaṃ te prasādataḥ ||21||
hariruvāca |
varamanyaṃ vṛṇuṣvāto durllabhaṃ tvaṃ bhavādṛśām |
varānno varayāmāsa tadā taṃ himajātmaja ||22||
tato:'tivimanāḥ somaḥ punastepe tapo mahat |
triṃśadvarṣasahasrāṇi devamānena putraka ||23||
tadāsau karuṇāpūrṇahṛdayo bhagavānagāt |
varaṃ varaya bhadraṃ te varado:'haṃ tavāgrataḥ |
somastu tādṛśaṃ vavre tacchrutvāntarddadhe hariḥ||24||
tato:'tivimanāḥ somaḥ punastepe tapo mahat|
catvāriṃśatsahasrāṇi tapastaptaṃ suduṣkaram ||25||
tatastuṣṭo hariḥ sākṣācchaṃkhacakragadādharaḥ |
uvāca vacanaṃ cāru somaṃ śrāṃtaṃ taponidhim ||26||
uttiṣṭhottiṣṭha bhadraṃ te varaṃ varaya suvrata |
tapasārādhito nūnaṃ tvayāhaṃ tapasāṃ nidhiḥ ||27||
soma uvāca |
yadi tuṣṭo bhavānmahyaṃ bhagavānvaradarṣabhaḥ |
grahanakṣatratārāṇāmādhipatyaṃ prayaccha me |
tathauṣadhīnāṃ viprāṇāṃ yāminyāśca jagatpate ||28||
śrībhagavānuvāca |
durllabhaṃ prārthitaṃ vatsa vitarāmi tathāpyaham |
evamastu tataḥ sarve samāgatya divau kasaḥ |
abhiṣiktavaṃto vidhivatsomaṃ rājānamādṛtāḥ ||29||
tato vimānamārūḍho rathena śubhravāsasā |
abhiṣṭutaḥ surairabhūddivaṃ gato niśākaraḥ ||30||
tataḥ prabhṛti tīrthaṃ tatsomakuṃḍeti durllabham |
yaddṛṣṭimātrānmanujā gatadoṣā bhavaṃti hi ||31||
yadupasparśanādyāṃti somalokaṃ viniṃditāḥ |
yatra snātvā vidhānena saṃtarpya pitṛdevatāḥ ||32||
somalokaṃ vinirbhidya viṣṇulokaṃ prapadyate |
upavāsatrayaṃ kṛtvā pūjayitvā janārddanam ||33||
na teṣāṃ punarāvṛttiḥ kalpakoṭiśatairapi |
trirātreṇa sthito bhūtvā pūjayitvā janārddanam |
japaṃ kurvanviśeṣeṇa maṃtrasiddhiḥ prajāyate ||34||
karmaṇā manasā vācā yatkṛtaṃ pātakaṃ nṛbhiḥ |
tatsarvaṃ kṣayamāyāti somakuṃḍekṣaṇādiha ||35||
tatastu dvādaśādityatīrthaṃ pāpaharaṃ param |
yatra taptvā punaḥ kṛcchraṃ kāśyapaḥ sūryatāṃ yayau ||36||
durllabhaṃ triṣu lokeṣu tapaḥsiddhyekakāraṇam |
ravivāreṣu saptamyāṃ saṃkrātyāṃ vidhivannaraḥ |
saptajanmakṛtātpāpātsnānamātreṇa śuddhyati ||37||
pārākaṃ vidhivatkṛtvā pūjanīyo janārddanaḥ |
sūryaloke sukhaṃ bhuktvā viṣṇuloke mahīyate ||38||
mahārogābhibhūtastu snātvā pītvā jalaṃ śuciḥ |
rogamukto:'cirādeva nātra kāryā vicāraṇā ||39||
catuḥsrotaṃ paraṃ tīrthaṃ vilocanamanoharam |
dharmārthakāmamokṣāste tiṣṭhaṃti dravarūpiṇaḥ ||40||

| | |
|---|---|
| हरेराज्ञानुसारेण क्षेत्रेऽस्मिन्वैष्णवे स्वयम् । | harerājñānusāreṇa kṣetre:'sminvaiṣṇave svayam \| |
| पुरुषार्था द्रवीभूता भूतानां मुक्तिहेतवः ॥४१॥ | puruṣārthā dravībhūtā bhūtānāṃ muktihetavaḥ \|\|41\|\| |
| पूर्वादिदिक्षु क्रमसन्निविष्टा धर्मप्रधाना इव रूपभाजः । | pūrvādidikṣu kramasanniviṣṭā dharmapradhānā iva rūpabhājaḥ \| |
| भजंति ये तान्क्रमसन्निविष्टान्प्रसन्नतैषां | bhajaṃti ye tānkramasanniviṣṭānprasannataiṣāṃ |
| सततं भवेद्धि ॥४२॥ | satataṃ bhaveddhi \|\|42\|\| |
| नान्यत्र क्षेत्रे मिलिताः कथंचिच्चत्वार एते त्रिदशैरलभ्याः । | nānyatra kṣetre militāḥ kathaṃciccatvāra ete tridaśairalabhyāḥ \| |
| तानग्रिमं जन्म जवेन लब्ध्वा | tānagrimaṃ janma javena labdhvā |
| पश्यंति पूर्वार्जितपुण्यपुंजाः ॥४३॥ | paśyaṃti pūrvārjitapuṇyapuṃjāḥ \|\|43\|\| |
| ये दुर्जना दुर्जनसंगभाजः | ye durjanā durjanasaṃgabhājaḥ |
| क्षमार्जवप्राणजयप्रधानाः । | kṣamārjavaprāṇajayapradhānāḥ \| |
| क्रीडामृगा ग्राम्यवधूजनानां | krīḍāmṛgā grāmyavadhūjanānāṃ |
| न ते प्रपश्यंत्यचिरात्पुमर्थान्॥४४॥ | na te prapaśyaṃtyacirātpumarthān\|\|44\|\| |
| तथैव पश्यंत्यचिरेण | tathaiva paśyaṃtyacireṇa |
| तत्त्वज्ञानैकहेतूनपि तान्पुमर्थान् ॥४५॥ | tattvajñānaikahetūnapi tānpumarthān \|\|45\|\| |
| अत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः । | atra brahmādayo devā ṛṣayaśca tapodhanāḥ \| |
| पर्वणि प्रयताः स्नातुं समायांति षडानन ॥४६॥ | parvaṇi prayatāḥ snātuṃ samāyāṃti ṣaḍānana \|\|46\|\| |
| ततः सत्यपदंनाम तीर्थं सर्वमनोहरम् । | tataḥ satyapadaṃnāma tīrthaṃ sarvamanoharam \| |
| त्रिकोणाकारमेवैतत्कुंडं कल्मषनाशनम् । | trikoṇākāramevaitatkuṃḍaṃ kalmaṣanāśanam \| |
| एकादश्यां हरिस्तत्र स्वयमायाति पावने ॥४७॥ | ekādaśyāṃ haristatra svayamāyāti pāvane \|\|47\|\| |
| तत्पश्चादृषयः सर्वे मुनयश्च तपोधनाः । | tatpaścādṛṣayaḥ sarve munayaśca tapodhanāḥ \| |
| स्नातुमायांति विधिवत्कुंडे सत्यपदाभिधे ॥४८॥ | snātumāyāṃti vidhivatkuṃḍe satyapadābhidhe \|\|48\|\| |
| गंधर्वाप्सरसां यत्र मध्याह्ने हरिवासरे । | gaṃdharvāpsarasāṃ yatra madhyāhne harivāsare \| |
| गानं शृण्वंति विरलाः सत्यव्रतपरायणाः ॥४९॥ | gānaṃ śṛṇvaṃti viralāḥ satyavrataparāyaṇāḥ \|\|49\|\| |
| दर्शनाद्यस्य तीर्थस्य पातकानि महांत्यपि । | darśanādyasya tīrthasya pātakāni mahāṃtyapi \| |
| पलायंते भयेनैव सिंहं दृष्ट्वा मृगा इव ॥५०॥ | palāyaṃte bhayenaiva siṃhaṃ dṛṣṭvā mṛgā iva \|\|50\|\| |
| स्वशाखोक्तविधानेन स्नानं कृत्वा विचक्षणः । | svaśākhoktavidhānena snānaṃ kṛtvā vicakṣaṇaḥ \| |
| सत्यलोकमवाप्नोति ततो नैःश्रेयसं पदम् ॥५१॥ | satyalokamavāpnoti tato naiḥśreyasaṃ padam \|\|51\|\| |
| अहोरात्रं शुचिर्भूत्वा उपोष्य च जनार्दनम् । | ahorātraṃ śucirbhūtvā upoṣya ca janārddanam \| |
| पूजयित्वा यथाशक्त्या स जीवन्मुक्तिभाजनः ॥५२॥ | pūjayitvā yathāśaktyā sa jīvanmuktibhājanaḥ \|\|52\|\| |
| ब्रह्मा विष्णुश्च रुद्रश्च त्रिकोणस्थाः समाहिताः । | brahmā viṣṇuśca rudraśca trikoṇasthāḥ samāhitāḥ \| |
| तपः कुर्वंत्यनुदिनं सर्वलोकादितोषणम् ॥५३॥ | tapaḥ kurvaṃtyanudinaṃ sarvalokāditoṣaṇam \|\|53\|\| |
| त्रिकोणमंडितं तीर्थं नाम्ना सत्यपदप्रदम् । | trikoṇamaṃḍitaṃ tīrthaṃ nāmnā satyapadapradam \| |
| दर्शनीयं प्रयत्नेन सर्वपापमुमुक्षुभिः ॥५४॥ | darśanīyaṃ prayatnena sarvapāpamumukṣubhiḥ \|\|54\|\| |
| जपं तपो हरिस्तोत्रं पूजां स्तुत्यभिवंदनम् । | japaṃ tapo haristotraṃ pūjāṃ stutyabhivaṃdanam \| |
| माहात्म्यं कुर्वतां वक्तुं ब्रह्मणापि न शक्यते ॥५५॥ | māhātmyaṃ kurvatāṃ vaktuṃ brahmaṇāpi na śakyate \|\|55\|\| |
| ततोऽतिविमलं नाम नरनारायणाश्रमम् । | tato:'tivimalaṃ nāma naranārāyaṇāśramam \| |
| द्विविधं दृश्यते तत्र पाथः परमनिर्मलम् ॥५६॥ | dvividhaṃ dṛśyate tatra pāthaḥ paramanirmalam \|\|56\|\| |
| उभाभ्यामुभयोः प्रीतिर्भवतीति विनिश्चितम् । | ubhābhyāmubhayoḥ prītirbhavatīti viniścitam \| |
| तत्र स्नात्वा प्रयत्नेन पूजयित्वा जनार्दनम् । | tatra snātvā prayatnena pūjayitvā janārddanam \| |
| सर्वपापविनिर्मुक्तस्तत्क्षणान्नात्र संशयः ॥५७॥ | sarvapāpavinirmuktastatkṣaṇānnātra saṃśayaḥ \|\|57\|\| |
| ततो नारायणावासशिखरे विमलाकृति । | tato nārāyaṇāvāsaśikhare vimalākṛti \| |
| तीर्थं पवित्रमुर्वश्या अभिव्यक्तिकरं भवेत् ॥५८॥ | tīrthaṃ pavitramurvaśyā abhivyaktikaraṃ bhavet \|\|58\|\| |
| स्कन्द उवाच । | skanda uvāca \| |
| अभिव्यक्तिः कथं तस्या उर्वश्याः शिखरे पितः । | abhivyaktiḥ kathaṃ tasyā urvaśyāḥ śikhare pitaḥ \| |
| किं पुण्यं किं फलं तत्र परं कौतूहलं वद ॥५९॥ | kiṃ puṇyaṃ kiṃ phalaṃ tatra paraṃ kautūhalaṃ vada \|\|59\|\| |
| शिव उवाच । | śiva uvāca \| |
| धर्मस्यपत्नी मूर्त्यासीत्तस्यां जातौ षडानन । | dharmasyapatnī mūrtyāsīttasyāṃ jātau ṣaḍānana \| |
| नरनारायणौ साक्षाद्भगवानेव केवलम् ॥६०॥ | naranārāyaṇau sākṣādbhagavāneva kevalam \|\|60\|\| |

| | |
|---|---|
| पित्रोराज्ञामनुप्राप्य तपोऽर्धं कृतमानसौ । | pitrorājñāmanuprāpya tapo:'rdhaṃ kṛtamānasau \| |
| उभयोर्नगयोस्तौ तु तपोमूर्ती इव स्थितौ ॥६१॥ | ubhayornagayostau tu tapomūrtī iva sthitau \|\|61\|\| |
| तौ दृष्ट्वा विस्मितः शक्रः प्रेषयामास मन्मथम् । | tau dṛṣṭvā vismitaḥ śakraḥ preṣayāmāsa manmatham \| |
| सगणं तपसो ध्वंसो यथा स्याद्गन्धमादनम् ॥६२॥ | sagaṇaṃ tapaso dhvaṃso yathā syādgandhamādanam \|\|62\|\| |
| विक्रम्य विधिवत्ते तु नारायणबलोदयम् । | vikramya vidhivatte tu nārāyaṇabalodayam \| |
| ज्ञात्वा हतमनस्कास्तानुवाच जगतीपतिः ॥६३॥ | jñātvā hatamanaskāstānuvāca jagatīpatiḥ \|\|63\|\| |
| हरिरुवाच । | hariruvāca \| |
| किमर्थमागता यूयमातिथ्यं गृह्यतामिति ॥६४॥ | kimarthamāgatā yūyamātithyaṃ gṛhyatāmiti \|\|64\|\| |
| इत्युक्त्वा फलमूलानि तेभ्यो दत्त्वोर्वशीं तथा । | ityuktvā phalamūlāni tebhyo dattvorvaśīṃ tathā \| |
| दत्त्वान्तर्धिमगादेव पश्यतां विघ्नकारिणीम् ॥६५॥ | dattvāntardhimagādeva paśyatāṃ vighnakāriṇīm \|\|65\|\| |
| ते तु गत्वा दिवं भीते शक्रायोचुर्बलं हरेः । | te tu gatvā divaṃ bhīte śakrāyocurbalaṃ hareḥ \| |
| शक्रस्तामुर्वशीं प्राप्य हर्षणैकयुतोऽभवत् ॥६६॥ | śakrastāmurvaśīṃ prāpya harṣaṇaikayuto:'bhavat \|\|66\|\| |
| ततः प्रभृति तत्तीर्थमुर्वशी नामतः पृथक् । | tataḥ prabhṛti tattīrthamurvaśī nāmataḥ pṛthak \| |
| प्रसिद्धं यत्र भगवान्स्वयमास्ते तपोमयः ॥६७॥ | prasiddhaṃ yatra bhagavānsvayamāste tapomayaḥ \|\|67\|\| |
| तत्र स्नात्वा विधानेन उपोष्य रजनिद्वयम् । | tatra snātvā vidhānena upoṣya rajanidvayam \| |
| पूजयित्वा हरिस्तत्र नरो नारायणो भवेत् ॥६८॥ | pūjayitvā haristatra naro nārāyaṇo bhavet \|\|68\|\| |
| उर्वशीकुण्डमासाद्य कामनावशतो नरः । | urvaśīkuṇḍamāsādya kāmanāvaśato naraḥ \| |
| उर्वशीलोकमाप्नोति स्नानमात्रेण पुत्रक ॥६९॥ | urvaśīlokamāpnoti snānamātreṇa putraka \|\|69\|\| |
| सदैव भगवांस्तत्र उर्वशीकुंड सन्निधौ । | sadaiva bhagavāṃstatra urvaśīkuṃḍa sannidhau \| |
| भूतानां भावयन्भव्यं तपोमूर्तिर्व्यवस्थितः ॥७०॥ | bhūtānāṃ bhāvayanbhavyaṃ tapomūrtirvyavasthitaḥ \|\|70\|\| |
| आमोदं तदुपरि वै प्रभञ्जनोऽपि | āmodaṃ tadupari vai prabhañjano:'pi |
| श्रीभर्तुर्वहति पदांबुजैकलब्धम् । | śrībharturvahati padāṃbujaikalabdham \| |
| यत्संगात्कलियुगकल्मषातुराणामुत्संगे | yatsaṃgātkaliyugakalmaṣāturāṇāmutsaṃge |
| न भवति पापभारपाकः ॥७१॥ | na bhavati pāpabhārapākaḥ \|\|71\|\| |
| यत्संगाद्धर्षमुपावहत्पदश्रीनिर्विण्णो गिरिविवरेच्युतैकसेवी । | yatsaṃgāddharṣamupāvahatpadaśrīnirviṇṇo girivivarecyutaikasevī \| |
| श्रीभर्तुश्चरणयुगं वहन्समन्तादभ्येति | śrībhartuścaraṇayugaṃ vahansamantādabhyeti |
| प्रशममहस्तपःसमीरे ॥७२॥ | praśamamahastapaḥsamīre \|\|72\|\| |
| गीर्वाणानुपहसति स्वघेन पूर्णः | gīrvāṇānupahasati svaghena pūrṇaḥ |
| कीटोऽपिप्रशमितदुर्नयो निरीहः। | kīṭo:'pipraśamitadurnayo nirīhaḥ\| |
| यत्रस्थः कुसुमनिवेदमात्मयोगपर्युष्टं | yatrasthaḥ kusumanivedamātmayogaparyuṣṭaṃ |
| जहदुपयास्यते पदं तत् ॥७३॥ | jahadupayāsyate padaṃ tat \|\|73\|\| |
| यत्रेत्वा मुनिमतयो | yatretvā munimatayo |
| बहिःपदार्थान्नापश्यन्निहितपदांबुजैकभाजः । | bahiḥpadārthānnāpaśyannihitapadāṃbujaikabhājaḥ \| |
| यत्रस्थः स्वयमपि गोपतिर्जनानामाधत्ते | yatrasthaḥ svayamapi gopatirjanānāmādhatte |
| स्वपदमनुक्रमागतानाम् ॥७४॥ | svapadamanukramāgatānām \|\|74\|\| |
| बहूनि संति तीर्थानि गिरौ नारायणाश्रिते । | bahūni saṃti tīrthāni girau nārāyaṇāśrite \| |
| सर्वपापहराण्याशु तान्यहं वेद नो जनः ॥७५॥ | sarvapāpaharāṇyāśu tānyahaṃ veda no janaḥ \|\|75\|\| |
| संसारकुहरे घोरे यत्र स्थगितमात्मनः । | saṃsārakuhare ghore yatra sthagitamātmanaḥ \| |
| उर्वशीकुण्डमासाद्य दिनमेकं वसेन्नरः ॥७६॥ | urvaśīkuṇḍamāsādya dinamekaṃ vasennaraḥ \|\|76\|\| |
| उर्वशीदक्षिणे भागे आयुधानि जगत्पतेः । | urvaśīdakṣiṇe bhāge āyudhāni jagatpateḥ \| |
| विद्यंते दर्शनात्तेषां न शस्त्रभयभाग्भवेत् ॥७७॥ | vidyaṃte darśanātteṣāṃ na śastrabhayabhāgbhavet \|\|77\|\| |
| य इदं शृणुयाद्भक्त्या श्रावयेद्वा समाहितः । | ya idaṃ śṛṇuyādbhaktyā śrāvayedvā samāhitaḥ \| |
| सर्वपापविनिर्मुक्तः सालोक्यं लभते हरेः ॥७८॥ | sarvapāpavinirmuktaḥ sālokyaṃ labhate hareḥ \|\|78\|\| |

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे
पञ्चधारादितीर्थमाहात्म्यवर्णनंनाम सप्तमोध्यायः ॥७॥

iti śrīskāṃde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ
dvitīye vaiṣṇavakhaṇḍe badarikāśramamāhātmye śivakārttikeyasaṃvāde
pañcadhārāditīrthamāhātmyavarṇanaṃnāma saptamodhyāyaḥ \|\|7\|\|

| | |
|---|---|
| वैष्णवखण्डः ॥३॥ बदरिकाश्रममाहात्म्यम् अध्यायः ॥८॥ | vaiṣṇavakhaṇḍaḥ \|\|3\|\| badarikāśramamāhātmyam adhyāyaḥ \|\|8\|\| |
| शिव उवाच । | śiva uvāca \| |
| ब्रह्मकुण्डाद्दक्षिणतो नरावासगिरिर्महान् । | brahmakuṇḍāddakṣiṇato narāvāsagirirmahān \| |
| यत्र भगवता मेरुः स्थापितो लोकसुन्दरः ॥१॥ | yatra bhagavatā meruḥ sthāpito lokasundaraḥ \|\|1\|\| |
| स्कन्द उवाच । | skanda uvāca \| |
| कथं भगवता मेरुः स्थापितो नरसन्निधौ । | kathaṃ bhagavatā meruḥ sthāpito narasannidhau \| |
| महत्कौतूहलं तात कथ्यतां यदि रोचते ॥२॥ | mahatkautūhalaṃ tāta kathyatāṃ yadi rocate \|\|2\|\| |
| महादेव उवाच । | mahādeva uvāca \| |
| यदा भगवतो वासो विशालायां समागतः । | yadā bhagavato vāso viśālāyāṃ samāgataḥ \| |
| देवा महर्षयः सिद्धाः सविद्याधरचारणाः ॥३॥ | devā maharṣayaḥ siddhāḥ savidyādharacāraṇāḥ \|\|3\|\| |
| विहाय मेरुशृंगाणि भगवद्दर्शनोत्सुकाः । | vihāya meruśṛṃgāṇi bhagavaddarśanotsukāḥ \| |
| भगवद्दर्शनाह्लादतिरस्कृतसुरालयाः ॥४॥ | bhagavaddarśanāhlādatiraskṛtasurālayāḥ \|\|4\|\| |
| तदा तु भगवांस्तेषां सुखहेतोः षडानन । | tadā tu bhagavāṃsteṣāṃ sukhahetoḥ ṣaḍānana \| |
| उत्पाद्य मेरुशृंगाणि करेणैकेन लीलया । | utpādya meruśṛṃgāṇi kareṇaikena līlayā \| |
| स्थापयामास सर्वेषां भगवान्प्रीतिवर्द्धनः ॥५॥ | sthāpayāmāsa sarveṣāṃ bhagavānprītivarddhanaḥ \|\|5\|\| |
| ततः सर्वे समालोक्य गिरिं कांचननिर्मितम् । | tataḥ sarve samālokya giriṃ kāṃcananirmitam \| |
| प्रसन्नास्तुष्टुवुः सर्वे नारायणमनामयम्॥६॥ | prasannāstuṣṭuvuḥ sarve nārāyaṇamanāmayam\|\|6\|\| |
| देवा ऊचुः । | devā ūcuḥ \| |
| योस्मत्सुखाय भवविश्रमणाय | yosmatsukhāya bhavaviśramaṇāya |
| बिभ्रल्लीलातनूः कनकशैलमिहानिनाय । | bibhrallīlātanūḥ kanakaśailamihāninnāya \| |
| जेता सुरार्द्दनशतं त्रिदशैकपक्षस्तस्मै | jetā surārddanaśataṃ tridaśaikapakṣastasmai |
| विधेम नम उग्रतपःश्रियाय ॥७॥ | vidhema nama ugratapaḥśriyāya \|\|7\|\| |
| यद्यत्करोति | yadyatkaroti kṛpayā |
| कृपया कृपणार्तितूलशैलाग्निराश्रितकृदेकविदां वरिष्ठः। | kṛpaṇārtitūlaśailāgnirāśritakṛdekavidāṃ variṣṭhaḥ\| |
| स्वेनैव तेन करणेन स तुष्यतां | svenaiva tena karaṇena sa tuṣyatāṃ |
| नो यस्यान्वकारि पुरुषेण न केनचिद्वै ॥८॥ | no yasyānvakāri puruṣeṇa na kenacidvai \|\|8\|\| |
| अस्माकमुन्नतधियां विदधाति सम्यक्छिक्षां | asmākamunnatadhiyāṃ vidadhāti samyakchikṣāṃ |
| पितेव करुणो निजलाभपूर्णः। | piteva karuṇo nijalābhapūrṇaḥ\| |
| त्रैलोक्यरक्षणविचक्षणदृष्टिपातपूर्णामृतांबुधिरसौ | trailokyarakṣaṇavicakṣaṇadṛṣṭipātapūrṇāmṛtāṃbudhirasau |
| विपदः प्रपायात् ॥९॥ | vipadaḥ prapāyāt \|\|9\|\| |
| ऋषय ऊचुः । | ṛṣaya ūcuḥ \| |
| येनाध्यस्तं भाति समस्तं | yenādhyastaṃ bhāti samastaṃ |
| जगदेकं क्रीडाभांडं सत्यतयाऽजस्य विभूम्नः । | jagadekaṃ krīḍābhāṃḍaṃ satyatayā:'jasya vibhūmnaḥ \| |
| भानां वृदं यद्वदनेप्याश्रितमूर्तिस्तस्मै | bhānāṃ vṛdaṃ yadvadanepyāśritamūrtistasmai |
| नित्यं शाश्वत तुभ्यं प्रणमाम ॥१०॥ | nityaṃ śāśvata tubhyaṃ praṇamāma \|\|10\|\| |
| सिद्धा ऊचुः । | siddhā ūcuḥ \| |
| यत्कृपालवत एव महांतः सिद्धिमीयुरितरे भवभाजः । | yatkṛpālavata eva mahāṃtaḥ siddhimīyuritare bhavabhājaḥ \| |
| तेऽचिरेण भवभीमपयोधिं | te:'cireṇa bhavabhīmapayodhiṃ |
| तीर्णवंत इति नः सुमनीषा ॥११॥ | tīrṇavaṃta iti naḥ sumanīṣā \|\|11\|\| |
| विद्याधरा ऊचुः । | vidyādharā ūcuḥ \| |
| विभो सद्गुणग्राम कल्याणमूर्ते | vibho sadguṇagrāma kalyāṇamūrte |
| परेशान संमानसंतानहेतो । | pareśāna saṃmānasaṃtānaheto \| |
| भवत्पादपद्मासवस्वादमत्ताः कृतार्था | bhavatpādapadmāsavasvādamattāḥ kṛtārthā |
| न चित्रं भवत्यत्र किंचित् ॥१२॥ | na citraṃ bhavatyatra kiṃcit \|\|12\|\| |
| ततस्तुष्टोऽथ भगवांस्तेषामासीद्दिवौकसाम् । | tatastuṣṭo:'tha bhagavāṃsteṣāmāsīddivaukasām \| |
| वरं वृणुध्वमित्युक्तास्ते प्रोचुर्वरदर्षभम् ॥१३॥ | varaṃ vṛṇudhvamityuktāste procurvaradarṣabham \|\|13\|\| |
| परितुष्टो भवान्साक्षाद्देवदेवो रमापतिः । | parituṣṭo bhavānsākṣāddevadevo ramāpatiḥ \| |

| | |
|---|---|
| बदरी न त्वया त्याज्या न च मेरुः कदाचन ॥१४॥ | badarī na tvayā tyājyā na ca meruḥ kadācana \|\|14\|\| |
| मेरुशृंगं प्रपश्यंति ये जनाः पुण्यभागिनः । | meruśṛṃgaṃ prapaśyaṃti ye janāḥ puṇyabhāginaḥ \| |
| तेषां वै त्वत्प्रसादेन मेरौ वासः प्रजायताम् ॥१५॥ | teṣāṃ vai tvatprasādena merau vāsaḥ prajāyatām \|\|15\|\| |
| तत्र भुक्त्वा चिराद्भोगान्भूयादन्ते लयस्त्वयि। | tatra bhuktvā cirādbhogānbhūyādante layastvayi\| |
| एवमस्त्विति चाभाष्य तत्रैवांतर्हितो हरिः ॥१६॥ | evamastviti cābhāṣya tatraivāṃtarhito hariḥ \|\|16\|\| |
| ततः प्रभृति ते सर्वे मेरुशृंगविहारिणः । | tataḥ prabhṛti te sarve meruśṛṃgavihāriṇaḥ \| |
| नरनारायणस्यांते पाल्यमाना मुहुर्मुहुः ॥१७॥ | naranārāyaṇasyāṃte pālyamānā muhurmuhuḥ \|\|17\|\| |
| कदाचिद्दिवि तिष्ठंति कदाचिन्मेरुमध्यतः । | kadāciddivi tiṣṭhaṃti kadācinmerumadhyataḥ \| |
| निर्विशंका निरुद्वेगा ऋषयश्च तपोधनाः ॥१८॥ | nirviśaṃkā nirudvegā ṛṣayaśca tapodhanāḥ \|\|18\|\| |
| भगवानपि तत्रैव नररूपेण तिष्ठति। | bhagavānapi tatraiva nararūpeṇa tiṣṭhati\| |
| धनुर्बाणधरः श्रीमांस्तपसा पावकोपमः । | dhanurbāṇadharaḥ śrīmāṃstapasā pāvakopamaḥ \| |
| आनंदमृषिवृंदस्य जनयंस्तप आस्थितः ॥१९॥ | ānaṃdamṛṣivṛṃdasya janayaṃstapa āsthitaḥ \|\|19\|\| |
| ततस्तु परमं तीर्थं लोकपालाभिवंदितम् । | tatastu paramaṃ tīrthaṃ lokapālābhivaṃditam \| |
| यत्र संस्थापयामास लोकपालान्हरिः स्वयम् ॥२०॥ | yatra saṃsthāpayāmāsa lokapālānhariḥ svayam \|\|20\|\| |
| स्कंद उवाच । | skaṃda uvāca \| |
| कथं भगवता तत्र लोकपालाश्च स्थापिताः । | kathaṃ bhagavatā tatra lokapālāśca sthāpitāḥ \| |
| महत्कौतूहलं तात कथयस्व महामते ॥२१॥ | mahatkautūhalaṃ tāta kathayasva mahāmate \|\|21\|\| |
| शिव उवाच । | śiva uvāca \| |
| एकदा मेरुमध्यस्थाश्रयानिह हरन्हरिः। | ekadā merumadhyasthāśrayāniha haranhariḥ\| |
| देवानामृषिमुख्यानां चरितं द्रष्टुमुद्यतः ॥२१॥ | devānāmṛṣimukhyānāṃ caritaṃ draṣṭumudyataḥ \|\|21\|\| |
| तं दृष्ट्वा सहसोत्थाय नमस्कृत्य दिवौकसः । | taṃ dṛṣṭvā sahasotthāya namaskṛtya divaukasaḥ \| |
| ऊचुस्ते विनयात्सर्वे प्रसीद भगवन्विभो ॥२३॥ | ūcuste vinayātsarve prasīda bhagavanvibho \|\|23\|\| |
| क्षणं विश्राम्य विधिवद्दृष्ट्वा तां विरलां भुवम् । | kṣaṇaṃ viśrāmya vidhivaddṛṣṭvā tāṃ viralāṃ bhuvam \| |
| सान्निध्यमृषिदेवानामयुक्तं भावयन्मिथः ॥२४॥ | sānnidhyamṛṣidevānāmayuktaṃ bhāvayanmithaḥ \|\|24\|\| |
| ततः प्रहस्य भगवानुवाच मधुसूदनः । | tataḥ prahasya bhagavānuvāca madhusūdanaḥ \| |
| लोकपालान्समाहूय नात्र स्थेयं भवद्विधैः ॥२५॥ | lokapālānsamāhūya nātra stheyaṃ bhavadvidhaiḥ \|\|25\|\| |
| ऋषयस्तापसाः सिद्धाः सस्त्रीका निवसंति हि । | ṛṣayastāpasāḥ siddhāḥ sastrīkā nivasaṃti hi \| |
| भवद्विधानामास्थानं पुरेव कल्पितं मया ॥२६॥ | bhavadvidhānāmāsthānaṃ pureva kalpitaṃ mayā \|\|26\|\| |
| ततः स त्वरितो गत्वा रम्ये गिरिवरे हरिः । | tataḥ sa tvarito gatvā ramye girivare hariḥ \| |
| लोकपालान्समाहूय स्थापयामास तान्गुह ॥२७॥ | lokapālānsamāhūya sthāpayāmāsa tānguha \|\|27\|\| |
| तत्रैव शैलदंडेन हत्वाग्निं जलकांक्षया । | tatraiva śailadaṃḍena hatvāgniṃ jalakāṃkṣayā \| |
| क्रीडापुष्करणीं तेषां निर्ममे सुमनोहराम ॥२८॥ | krīḍāpuṣkaraṇīṃ teṣāṃ nirmame sumanoharāma \|\|28\|\| |
| सस्त्रीका यत्र गीर्वाणा विचरंति निजेच्छया । | sastrīkā yatra gīrvāṇā vicaraṃti nijecchayā \| |
| गायंति स्वनुमोदंति गंधर्वास्त्रिदिवौकसाम् ॥२९॥ | gāyaṃti svanumodaṃti gaṃdharvāstridivaukasām \|\|29\|\| |
| वनानि कुसुमामोदरम्याणि परितोषतः । | vanāni kusumāmodaramyāṇi paritoṣataḥ \| |
| दिनानि यत्र गच्छंति क्षणप्रायाणि देहिनाम् ॥३०॥ | dināni yatra gacchaṃti kṣaṇaprāyāṇi dehinām \|\|30\|\| |
| भगवानपि तत्रैव तेषामानंदमावहन्। | bhagavānapi tatraiva teṣāmānaṃdamāvahan\| |
| द्वादश्यां पौर्णमास्यां च स्वयमायाति मज्जने ॥३१॥ | dvādaśyāṃ paurṇamāsyāṃ ca svayamāyāti majjane \|\|31\|\| |
| तत्पश्चादृषयः सर्वे मुनयश्च तपोधनाः । | tatpaścādṛṣayaḥ sarve munayaśca tapodhanāḥ \| |
| यत्र स्नात्वा विधानेन गुह मध्याह्नकालतः । | yatra snātvā vidhānena guha madhyāhnakālataḥ \| |
| असंगं परमं ज्योतिर्जले पश्यंति चक्षुषा ॥३२॥ | asaṃgaṃ paramaṃ jyotirjale paśyaṃti cakṣuṣā \|\|32\|\| |
| सर्वतीर्थावगाहेन यत्फलं परिकीर्तितम् । | sarvatīrthāvagāhena yatphalaṃ parikīrtitam \| |
| तत्फलं तत्क्षणादेव दण्डपुष्करिणीक्षणात् ॥३३॥ | tatphalaṃ tatkṣaṇādeva daṇḍapuṣkariṇīkṣaṇāt \|\|33\|\| |
| यत्र काम्यानि कर्माणि सफलानि मनीषिणाम् । | yatra kāmyāni karmāṇi saphalāni manīṣiṇām \| |
| यत्र पिंडप्रदानेन गयातोऽष्टगुणं फलम् ॥३४॥ | yatra piṃḍapradānena gayāto:'ṣṭaguṇaṃ phalam \|\|34\|\| |
| यज्ञो दानं तपः कर्म सर्वमक्षयमुच्यते। | yajño dānaṃ tapaḥ karma sarvamakṣayamucyate\| |
| द्वादश्यां शुक्लपक्षस्य ज्येष्ठे मासि षडानन ॥३५॥ | dvādaśyāṃ śuklapakṣasya jyeṣṭhe māsi ṣaḍānana \|\|35\|\| |
| तत्र स्नात्वा विधानेन कृतकृत्यो भवेद्यतः । | tatra snātvā vidhānena kṛtakṛtyo bhavedyataḥ \| |

बदरीतीर्थमध्ये तु गुप्तमेतत्सुरोत्तमैः ।
न वाच्यं यत्र कुत्रापि तव प्रीत्या मयोदितम् ॥३६॥
वक्तव्यं किमिह बहु प्रभूतपुण्याः
पश्यंति प्रथितमिदं सुरैकगुप्तम् ।
नान्येषां कथमपि चेतसि प्रसंगाद्देवैः
स्यादनुदिनचिंतितं गुहैतत् ॥३७॥
येषां वै भगवति चेत्समग्रकर्म
स्वाध्यायाभ्यसनविधिक्रमेण जातम् ।
पश्यंति त्रिभुवनदुर्लभं सुतीर्थं
दंडोदं न भवति चान्यथा सुदृष्टम् ॥३८॥
दंडोदकात्परं तीर्थं न विष्णोः सदृशोऽमरः ।
विशालासदृशं क्षेत्रं न भूतं न भविष्यति ॥३९॥
सेवनीया प्रयत्नेन विशाला च विचक्षणैः ।
य इच्छेत्सततं धाम भगवत्पार्श्ववर्ति वै ॥४०॥
स्कंद उवाच ।
गंगामाश्रित्य तीर्थानि कानि संतीह सत्पदे ।
श्रेयस्कराणि भूरीणि संक्षेपात्तानि मे वद ॥४१॥
महादेव उवाच ।
गंगायां यत्र संयोगो मानसोद्भेदसन्निधौ ।
तत्तीर्थं विमलं पुण्यं प्रयागादधिकं महत् ॥४२॥
त्रिंशद्वर्षसहस्राणि वायुभोजनतो भवेत् ।
तत्फलं स्नानमात्रेण गंगायाः संगमे नृणाम् ॥४३॥
संगमाद्दक्षिणे भागे धर्मक्षेत्रं प्रकीर्तितम् ।
यत्र मूर्त्या श्रुतौ जातौ नरनारायणावृषी ॥४४॥
तत्क्षेत्रं पावनं मर्त्ये सर्वेषामुत्तमोत्तमम् ।
धर्मस्तत्रैव भगवांश्चतुष्पादवतिष्ठति ॥४५॥
यत्र यज्ञास्तपो दानं यत्किंचित्क्रियते नृभिः ।
तत्पुण्यस्य क्षयो नास्ति कल्पकोटिशतैरपि ॥४६॥
ततो दक्षिणदिग्भाग उर्वशी संगमाभिधम् ।
सर्वपापहरं पुंसां स्नानमात्रेण देहिनाम् ॥४७॥
कूर्मोद्धारस्ततः साक्षाद्धरिभक्त्येकसाधनम् ।
स्नानमात्रेण भूतानां सत्त्वशुद्धिः प्रजायते ॥४८॥
ब्रह्मावर्त्तस्ततः साक्षाद्ब्रह्मलोकैककारणम् ।
दर्शनादेव तीर्थस्य सर्वपापक्षयो भवेत् ॥४९॥
बहूनि संति तीर्थानि दुर्गम्यानीह देहिनाम् ।
संक्षेपात्कथितं वत्स तवादरवशादिदम् ॥५०॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तः पदं विष्णोः प्रपद्यते ॥५१॥
राजा विजयमाप्नोति सुतार्थी लभते सुतम् ।
कन्यार्थी लभते कन्यां कन्या विंदति सत्पतिम् ॥५२॥
धनार्थी धनमाप्नोति सर्वकामैकसाधनम् ॥५३॥
मासमात्रं नरो भक्त्या शृणुयाद्यः समाहितः ।
तस्याभीष्टसमावाप्तिर्दुर्लभोपि न संशयः ॥५४॥
आधिव्याधिभयं घोरं दारिद्र्य कलहं तथा ।
यस्य गेहेषु माहात्म्यं तत्रैतानि न कर्हिचित् ॥५५॥
नापमृत्युर्न सर्पादि दौर्भाग्यं चापि वर्तते ।
दुःस्वप्नग्रहपीडा च परराष्ट्रभयं तथा ॥५६॥
युद्धे यात्राप्रयाणे च पठनीयं प्रयत्नतः ।

badarītīrthamadhye tu guptametatsurottamaiḥ |
na vācyaṃ yatra kutrāpi tava prītyā mayoditam ||36||
vaktavyaṃ kimiha bahu prabhūtapuṇyāḥ
paśyaṃti prathitamidaṃ suraikaguptam |
nānyeṣāṃ kathamapi cetasi prasaṃgāddevaiḥ
syādanudinaciṃtitaṃ guhaitat ||37||
yeṣāṃ vai bhagavati cetsamagrakarma
svādhyāyābhyasanavidhikrameṇa jātam |
paśyaṃti tribhuvanadurllabhaṃ sutīrthaṃ
daṃḍodaṃ na bhavati cānyathā sudṛṣṭam ||38||
daṃḍodakātparaṃ tīrthaṃ na viṣṇoḥ sadṛśo:'maraḥ |
viśālāsadṛśaṃ kṣetraṃ na bhūtaṃ na bhaviṣyati ||39||
sevanīyā prayatnena viśālā ca vicakṣaṇaiḥ |
ya icchetsatataṃ dhāma bhagavatpārśvavarti vai ||40||
skaṃda uvāca |
gaṃgāmāśritya tīrthāni kāni saṃtīha satpade |
śreyaskarāṇi bhūrīṇi saṃkṣepāttāni me vada ||41||
mahādeva uvāca |
gaṃgāyāṃ yatra saṃyogo mānasodbhedasannidhau |
tattīrthaṃ vimalaṃ puṇyaṃ prayāgādadhikaṃ mahat ||42||
triṃśadvarṣasahasrāṇi vāyubhojanato bhavet |
tatphalaṃ snānamātreṇa gaṃgāyāḥ saṃgame nṛṇām ||43||
saṃgamāddakṣiṇe bhāge dharmakṣetraṃ prakīrtitam |
yatra mūrtyā śrutau jātau naranārāyaṇāvṛṣī ||44||
tatkṣetraṃ pāvanaṃ martye sarveṣāmuttamottamam |
dharmastatraiva bhagavāṃścatuṣpādavatiṣṭhati ||45||
yatra yajñāstapo dānaṃ yatkiṃcitkriyate nṛbhiḥ |
tatpuṇyasya kṣayo nāsti kalpakoṭiśatairapi ||46||
tato dakṣiṇadigbhāga urvaśī saṃgamābhidham |
sarvapāpaharaṃ puṃsāṃ snānamātreṇa dehinām ||47||
kūrmoddhārastataḥ sākṣāddharibhaktyekasādhanam |
snānamātreṇa bhūtānāṃ sattvaśuddhiḥ prajāyate ||48||
brahmāvarttastataḥ sākṣādbrahmalokaikakāraṇam |
darśanādeva tīrthasya sarvapāpakṣayo bhavet ||49||
bahūni saṃti tīrthāni durgamyānīha dehinām |
saṃkṣepātkathitaṃ vatsa tavādaravaśādidam ||50||
ya idaṃ śṛṇuyānnityaṃ śrāvayedvā samāhitaḥ |
sarvapāpavinirmuktaḥ padaṃ viṣṇoḥ prapadyate ||51||
rājā vijayamāpnoti sutārthī labhate sutam |
kanyārthī labhate kanyāṃ kanyā viṃdati satpatim ||52||
dhanārthī dhanamāpnoti sarvakāmaikasādhanam ||53||
māsamātraṃ naro bhaktyā śṛṇuyādyaḥ samāhitaḥ |
tasyābhīṣṭasamāvāptirdurlabhopi na saṃśayaḥ ||54||
ādhivyādhibhayaṃ ghoraṃ dāridrya kalahaṃ tathā |
yasya geheṣu māhātmyaṃ tatraitāni na karhicit ||55||
nāpamṛtyurna sarpādi daurbhāgyaṃ cāpi vartate |
duḥsvapnagrahapīḍā ca pararāṣṭrabhayaṃ tathā ||56||
yuddhe yātrāprayāṇe ca paṭhanīyaṃ prayatnataḥ |

| | |
|---|---|
| विवाहे च विवादे च शुभकर्मणि यत्नतः ॥५७॥ | vivāhe ca vivāde ca śubhakarmaṇi yatnataḥ \|\|57\|\| |
| पूर्णं वाऽध्यायमात्रं वा तदर्धं वा विचक्षणैः । | pūrṇaṃ vā:'dhyāyamātraṃ vā tadardhaṃ vā vicakṣaṇaiḥ \| |
| सर्वकार्यप्रसिद्धिः स्यान्नात्र कार्या विचारणा ॥५८॥ | sarvakāryaprasiddhiḥ syānnātra kāryā vicāraṇā \|\|58\|\| |

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये
वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसंवादे बदरिकाश्रमे
मेरुसंस्थापनतीर्थलोकपालतीर्थदंडपुष्करिणीतीर्थधर्मक्षेत्रादिविविधतीर्थक्षेत्रमाहात्म्य
वर्णनंनामाष्टमोऽध्यायः ॥८॥ ॥छ॥

iti śrīskānde mahāpurāṇa ekāśītisāhasryāṃ saṃhitāyāṃ dvitīye
vaiṣṇavakhaṇḍe badarikāśramamāhātmye śivakārttikeyasaṃvāde badarikāśrame
merusaṃsthāpanatīrthalokapālatīrthadaṃḍapuṣkariṇītīrthadharmakṣetrādivividhatīrthakṣetramāhātmya
varṇanaṃnāmāṣṭamo:'dhyāyaḥ ||8|| ||cha||